ले कुजार्कयोर्भौमसूर्ययोर्यथासंख्यमुदयास्तगयोर्लग्नसप्तमस्थयोर्लग्ने भौमे सप्तमस्थे आर्के ग
र्भयुताया नार्याः शस्त्रकृतं शस्त्रहेतुकं मरणं वदेत् ब्रूयात्। तथा तेनैव प्रकारेण गर्भयुता विप
द्यत इत्यर्थः। मासाधिपताविति। गर्भमासेषु मासाधिपान् वक्ष्यति। कललघनेत्यादिना। तत्र निषेक
कालेयाग्रहोयनग्रहेण विजितो भवति। केतुना वधुमितउल्कया चाभिहतः पिनापीडित इत्यु
च्यते। तस्यापि निपीडिते ग्रहस्यायामासोभवति मासाधिपत्यं तस्य भवत्कालं तस्मिन् काले गर्भस्य श्र
वणं च्युतिं समादिशेत् वदेत्॥ ९॥ अधुना गर्भपुष्टिस्थानं वंशास्थेनाह॥ शशांकलग्नोपगतैः शुभग्रहै

त्रिकोणजायार्थसुखास्पदस्थितिः॥ तृतीयालाभं द्वीगतेष्वपापाक्षैः सुखीति गन्नैर्नरविणा निरीक्षितः॥१०॥ यत्र
राशौ शशांकस्थं दृष्टितस्तत्रैव स्वस्तनग्रादेर्व्यवस्थिते बुधगुरुशुक्रैरित्यर्थः। अथवा लग्नास्थैः शुभग्रहैर्ल
ग्नव्यवस्थितैरथवा केश्चिन् शशांकोपगतैः केश्चिच्छुभोपगतैरेवं शशांकोपगतैः शुभग्रहैरुदयोप
गतैर्वा अथवा त्रिकोणजायार्थसुखास्पदस्थितिः त्रिकोणं नवपंचमं जायास्थानं सप्तमं अर्थस्थानं द्विती
यं आस्पदं स्थानं दशमं एतेषु त्रिकोणजायार्थसुखास्पदेषु यथासंभवं द्वयोर्वा स्थितैः रविणास्वर्येणाय
दि निरीक्षिता दृष्टः शशी लग्नं वा भवति। यस्मादवयोगः सौम्यैस्त्रिकोणधनार्थस्वांबुमांस्थैर्वा। पापैस्त्रि
लाभयातैः सुखी च गन्नैर्निरीक्षितो दृष्ट रविणा॥८॥ अथ निषेकस्य निषेककालाज्जातस्य जन्मकालात
ज्जातस्य उभयोरपि त्र्यस्रकाला द्वापुंस्त्रीविनागतानं शार्दूलविक्रीडितेनाह॥ युजाख्यपुरुषांशकेषु बलि
भिर्लग्नार्कगुर्विंदुभिः पुंजन्मप्रवदेत्समांशकगतैर्युग्मेषु तैर्योषितः। गुर्वर्कौ विषमे नरं शशिसितौ वक्रश्च
युग्मे स्त्रियं द्व्यंगस्था बुधवीक्षणाद्यमलकं कुर्वन्ति पक्षे स्वके॥११॥ युजाख्यपुरुषांशकेष्विति। लग्नं मुदयलग्नं
अर्क आदित्य गुरुर्जीवः इंदुश्चंद्रः एतैर्लग्नार्कगुर्विंदुभिरोजक्षेत्रस्थैर्विषमराशिव्यवस्थितैर्न केवलं यावद्वि
षमराशिष्ववस्थितैर्विषमनवांशकगतैर्बलिभिः पुंसो जन्म वदेत्। न चात्र विषमनवांशग्रहणं नास्ति। ४१

कथं व्याख्यातं विषमनवांशकगैरिति उच्यते केष्विति वचनात्। पुरुषराशीनामंशका इत्यर्थः। यतं एव विषम
राशयस्त एव पुरुषराशयः। समांशकगतैर्युग्मेष्विति। तैरिव लग्नार्कगुर्विंदुभिर्युग्मराशिस्थितैः समराशि
व्यवस्थितैर्न केवलं यावत्समांशकगतैर्युग्मराशिनवांशकेष्विति वचनात्कस्थैर्बलिभिर्योषित
स्त्रीयो जन्म प्रवदेत्। आद्ये तेषां यथाभिहितानां लग्नग्रहाणां शुभयविकल्पकाणां बाहुल्यात्पुंस्त्रीनिर्दे
शः। साम्यबलाधिकत्वात् गुर्वर्काविति। गुरुर्जीवः अर्क आदित्य एतावुभावपि विषमे विषमराशौ गतौ या
वत्तत्र नवांशकास्थो नरं मनुष्यं कुरुतः। बलग्रहणमप्यत्रानुवर्त्तते। शशी वांद्रसितः शुक्रः वक्रोऽङ्गा
रक एते यदि सबला युग्मे समराशौ गता यत्र तत्र नवांशकस्थाः स्त्रियं जनयंति। अत एव ग्रहा व्यंग
स्था यत्र तत्र राशौ द्विशरीरनवांशकगता बुधवीक्षणात् बुधदृष्टा यमलौ द्वौ स्वपक्षे कुर्वंति। आत्मी
यपक्षे पुरुषनवांशकाद्वित्यर्थः। एतदुक्तं भवति। चत्वारो द्विस्वभावा मिथुनकन्याधन्विमीनाः। तत्र मि
थुनधन्विनौ पुरुषांशकौ कन्यामीनौ स्त्र्यंशकौ। तेन यथासंभवं मिथुनधनुरंशकगता वा दृष्टजा
तौ। यदि बुधेन यत्र तत्रावस्थितेन दृश्यंते। तदा यमलौ द्वौ कन्ये वाच्ये। अथ द्वावेव वर्गो यथासंभवं
कन्यामीनांशगता राशिशुक्रभौमा यत्र तत्रावस्थितेन बुधेन दृश्यंते। तदा यमलौ द्वे कन्ये वाच्ये॥

अथ द्वावेव बलाग्रौ यथा दर्शितास्तथोच्यते। अनेनैव स्वल्पजातके उक्तं। बलिनो विषमेऽर्कगुरू नरं स्त्रि
यं समभेषु कुजेंदुसिताः। यमलौ द्विशरीरांशस्थिता बुधं दृष्ट्वा स्वपक्षसमाविति। अन्यथा पु
नरुक्ता स्यात्। कुजार्कपुरुषांशकेष्वित्यनेनैवावगतार्थत्वात्। बलग्रहणमत्रानुवर्त्तनीयमिति
॥७॥ अथ पुंजन्मयोगांतरमुपेंद्रवज्रयाह। विहाय लग्नं विषमर्क्षसंस्थः सौरोऽपि पुंजन्मकरो
विलग्नात्। प्रोक्तग्रहाणामवलोक्य वीर्यं वाच्यः प्रसूतौ पुरुषोंगना वा॥१२ उक्तायोगस्यावसारो नान्य
था। आधानलग्नं पृच्छाकालिकं वा लग्नं विहाय यत्र क्वापि सौरः शनैश्चरो लग्नाद्विषमर्क्षगतः तृतीयपंचम
स सप्तमनवमैकादशानामन्यतमस्थः पुंजन्मकरः पुरुषजन्मकरो भवति। प्रोक्तग्रहाणां कथितयो
गकर्तॄणां वीर्यं बलमवलोक्य विचार्य प्रसूतौ प्रसवकाले पुरुषो नारी अंगना स्त्री वा वक्तव्या। एतदुक्तं
भवति। यत्र स्फुटपुरुषजन्मयोगसंभवस्तत्र पुरुषो वाच्यः। यदा योगद्वयसंभावो भवति। तदा योगयो
बलवद्ग्रहाश्रितनिर्मितस्तद्वशात् पुंस्त्रीजन्म वक्तव्यं॥८॥ अथ क्लीवयोगान् शार्दूलविक्रीडितेनाह॥
अन्योन्यं यदि पश्यतः शशिरवी यद्यार्किसौम्यावपि वक्रो वा समगं दिनेशमसमे चंद्रोदयौ चेत्स्थितौ
युग्मौजर्क्षगतावपींदुशशिजौ भ्वात्मजेनेक्षितौ ~~[illegible]~~ पुंभागे सितलग्नशी ४२

त~~[illegible]~~किरणाः स्युः क्लीवयोगाः स्मृताः॥९॥ अन्योन्यमिति। शशी चंद्रः रविरादित्यः एतौ शशिरवी यथाक्र
मे युग्मौजर्क्षगतौ पुं~~भागे सितलग्नशीतकिरणाः स्युः क्लीवयोगाः स्मृताः~~ समविषमराशिस्थावन्योन्यं परस्प
रं यदि पश्यतः। समराशिस्थश्चंद्रो विषमराशिगतमर्कं पश्यति अर्कश्च शशिनं पश्यति तदा क्लीवयोग एकः
यद्यार्किसौम्यावपि। आर्किः सौरः सौम्यो बुधः एतौ वार्किसौम्यौ यथाक्रमं युग्मौजर्क्षगतावन्योन्यं यदि प
श्यतस्तदा द्वितीयो योगः॥ वक्रो वा समगमिति। वक्रोऽङ्गारकः विषमर्क्षगतः समगं समराशिस्थं दि
नेशं सूर्यं पश्यति। सूर्यश्चांगारकं पश्यति तदा तृतीयो योगः॥ असमे चंद्रोदयौ चेदिति। चंद्रः शशी उद
यो लग्नं एतावसमे विषमराशौ अवस्थितौ भ्वात्मजेनांगारकेन समराशिगेन ईक्षितौ दृ
ष्टौ तदा चतुर्थो योगः॥ असमे युग्मौजर्क्षगतावपीति। इंदुश्चंद्रः शशिजो बुधः एतौ यथासंख्यं युग्मौ
जर्क्षगतौ भ्वात्मजेन यत्र तत्रावस्थितौ दृश्येते तदा पंचमो योगः॥ पुंभाग इति। सितः शुक्रः लग्न
मुदयः शीतकिरणश्चंद्र एते सितलग्नशीतकिरणाः यत्र तत्र राशौ पुंभागे विषमनवांशके अव
स्थिता भवंति। तदा क्लीवजन्मयोगः षष्ठः तथा च बादरायणः॥ अन्योन्यं रविशशिनौ विषमावि
षमर्क्षगौ निरीक्षेते। इंदुज रविपुत्रौ वा तथा ये च नपुंसकं कुरुतः॥ वक्रो विषमे सूर्यः समगो

वेपरस्परालोकात्। विषमर्क्षे लग्नेंदुः समराशिगतः कुजोवलोकयति। बुधचंद्रौ कुजदृष्टौ विषमर्क्षे
समर्क्षे गतौ तथैवोक्तं। कुजनवांशकसंस्थौ लग्नेंदु सितौ तथैवोक्तौ॥ इति। एते योगाः पूर्वयोगा
नामभावे व्यक्तव्याः। तेषां योगानामेतेषां च संभावात् तेषामेव बलवत्वं॥८॥ अथधुना द्वित्रिगर्भसंभ
वयोगान्शार्दूलविक्रीडितेनाह॥ युग्मेचंद्रसितौ तथौजभवने स्युर्ज्ञारजीवोदया लग्नेंदू नृनिरी
क्षितौ च समगौ युग्मेषु वा प्राणिनः। कुर्युस्ते मिथुनं ग्रहोदयगतान्द्व्यंगांशकान्पश्यति स्वांशे
ज्ञस्त्र्यंते तलगांशकवशाद्युग्मं च मिश्रैः समं॥१४॥ युग्मेचंद्रशुक्राविति। चंद्रशुक्रौ राशिषु युग्मे
समराशौ व्यवस्थितौ तथा तानि च प्रकारेण ज्ञारजीवोदयाः। ज्ञो बुधः आरो अंगारक जीवो बृहस्पतिः।
उदयं लग्नं। एतत्सर्वं एवौजभवानविषमराशौ स्थितास्युः। एवमेते मिथुनं कुर्युः। दारिकादारक
द्वय। लग्नेंदू उदयं चंद्रो समगौ युग्मराशिव्यवस्थितौ नृनिरीक्षितौ नरग्रहेणायनाकेनचित् दृ
ष्टौ भवतः। तथापि मिथुनं गर्भस्थं वाच्यं। युग्मेषु वा प्राणिनः। त एव पूर्वोक्ता ज्ञारजीवोदयाः सर्वे
व युग्मेषु समराशिषु स्थिताः प्राणिनो बलिनो भवंति। तान्यग्रहोदयगतान्द्व्यंगांशकान्स्वांशस्थ
नवांशकस्थो ज्ञः पश्यति सति मिथुनं वक्तव्यं। तत्रायं विशेषः। ज्ञोगांशकसंस्थः। वशाद्युग्मं तु। ता ४३

बुधेगतो व्यवस्थितो यस्मिन्नवांशके तदंशाद्युग्मं। बुधे यस्मिन्नवांशके व्यवस्थितः सयल्लिंगांशकः तल्लिं
गं तत्र गर्भे वक्तव्यं। एकस्तद्विपरीतः। एतदुक्तं भवति। मिथुनांशकस्थो बुधो यदा ग्रहोदयगतान्द्व्यंगांशका
न्पश्यति तदा दारकद्वयं दारिकाचैका वक्तव्या। अथ कन्यानवांशकस्थो बुधः पश्यति तदा दारिकाद्वयं एको
दारकश्च वक्तव्यः। मिश्रैः सममिति। ते ग्रहोदयाः बुधेः मिश्राः स्थिते द्विस्वभावसमानलिंगस्थिते
समं त्रितयं वक्तव्यं। एतदुक्तं भवति मिथुननवांशकव्यवस्थिता मिथुनधन्व्यंशकन्यांशकव्यवस्थितान्
ग्रहोदयान्पश्यति तदा गर्भे दारिकात्रितयं वक्तव्यं। तथा च सारावल्यां। समराशौ राशिसितौ या विषाम
गुरुसौम्यलग्नेषु योगे गर्भगतं विद्धि मिथुनं तु वक्तव्यं। लग्नेंदू वा समगौ पुंग्रहदृष्टौ च मिथुनकरौ।
उदयज्ञवक्रगुरवो बलिनः समराशिगाश्चदेवोक्तं॥ द्विशरीरांशकयुक्तान्ग्रहान्रवि लग्नं च पश्यंति
दुःसुते। कन्यांशाद्वकन्यौ पुरुषश्च निषिच्यते गर्भे मिथुनीस्सकन्यैका द्वौ पुरुषौ नृ तथा समवं स्यात्तामि
थुनधनराशिगतान ग्रहान्वि लग्नं च पश्यतौ दुसुतः। मिथुनांशस्थश्च यदा पुरुषत्रितयं तदा गर्भे।
यथासंभवं द्विस्वभावमिथुनकन्याधनुर्धरमीनसंबंधेषु नवांशकेषु स्थितान्स्वनवांशकस्थे
न कन्यामिथुनयोरन्यतमनवांशकास्थबुधेन यदि दृश्यते। तदा गर्भे ते ग्रहा समनयं कुर्युः। ब

सप्रदात् कन्या स्त्रीनांशकस्थान् विदुगानुदयं च युवतिमागतेऽगतः। पत्रपतिर्निशि रगुतनयः कन्या
त्रितयं तदा गर्भे॥ ७॥ अधुनाऽधिकसंभवयोगमाह॥ धनुर्द्धररस्यांत्यगते विलग्ने ग्रहे
स्तदंशोपगते बलिष्ठैः॥ ज्ञानार्किणा वार्यसुतेन दृष्टेऽस्मेति प्रसूता अपि कोशसंस्थाः॥ ८ धन्विवि
ग्ने धनुरंशके चोदयमुपगाते। यत्र तत्र राशौ व्यवस्थितैः सर्वग्रहैर्धन्वांशोपगतैर्बलवद्भिश्च ते न बुधेन ज्ञा
र्किणा शनैश्चरेण वा वार्यसुतेन बलवता दृष्टे बलोकिते प्रसूता बहवः कोशसंस्था जरायुवेष्टि
ता विग्रहा गर्भे संतिष्ठं च वयम्प्र दशायावत्। एवमुक्तं मासाधिपतौ निपीडिते तत्कालं श्रवणं समा
दिशेदिति॥ ७॥ तदधुनाग्रहस्य मासाधिपान् कुटकेनाह॥ कललघनांकुरास्थिचर्मांगजाचेतनताः
सितकुजजीवसूर्यचंद्रार्किबुधाः परतः उदयपचंद्रसूर्यनाथाः क्रमशो गदिता भवंति शुभाशुभं
मासाधिपतेः समदशां॥ १६ सितादयो गर्भस्य प्रथममासाद्यन्तिके कललादीनि वर्द्धयंति। तद्यथा गर्भ
स्य प्रथमे मासि कललं भवति। शुक्रशोणिते घनेऽस्मिन्नाच्छातं तत्र गर्भस्य तस्मिन्मासेऽधिपतिः शुक्रो
ऽधिपतिर्भवति। द्वितीये घनता काठिन्यं। तत्र कुजोऽङ्गारकोऽधिपतिः। तृतीयेऽंकुराः स्युः शिरहस्ताद्य
वयवजन्म। तत्र जीवो बृहस्पतिरधिपतिः। चतुर्थे स्थिसंभवस्तत्र सूर्योऽधिपतिः। पंचमे चर्मसं ४४

भवस्तत्र चंद्रोऽधिपतिः। षष्ठेऽङ्गजसंभवो रोमजन्म तत्रार्किः सौरो भवति। सप्तमे चेतनासंभव
ति। चेतनता स्वत्वनावस्तत्र स्वतंत्रं बुधोऽधिपतिः। बुधमासात्परतोऽन्येषां मासानां गर्भस्याशनोद्वे
गप्रसवकरास्त्वावादयचंद्रसूर्यनाथाः स्वामिनः क्रमशो गदिताः उक्ताः। तत्राष्टम मासि गर्भस्थो
जंतुरशनं करोति। मात्रापीतं भक्षं रसादितस्य नाभिनालेन लग्नतनालेन संक्रमते। तत्र गर्भाधान
लग्नाधिपति। पतितो योऽग्रहः सोऽष्टमाधिपतिः॥ नवमे गर्भस्थस्योद्वेगो भवति। तत्र चंद्रोऽधिपतिः। दशा
मे गर्भप्रसवो भवति। तत्र सूर्यो रविरधिपातिः। तथा च स्वल्पजातके। कललघनाङ्कुरास्थित्वग्रो
मस्मृतिमसुद्भवाः क्रमशः। मासेषु शुक्रकुजजीवसूर्यचंद्रार्किसौम्यानां। अशनोद्वेगप्रसवाः पर
तो लग्नेशचंद्रसूर्याणां इति॥ अत्र प्रथमद्वितीयमासाधिपतये यवनेश्वराणामहमतासिद्धः। तथा च
तद्वाक्यं। कुजास्फुजिज्जीवरवीन्दुसौरशशांकलग्नेंदुदिवाकराणां। मासाधिपत्यप्रभवो नवेषां जयो
पघाते ग्रहवद्भवंति। आद्यतु मासे कललं द्वितीये मासे स्तूनायपि भवंति शाखाः। आस्थीन्यथ स्नायु
शिराश्चतुर्थे मज्जात्वचर्मापि च पंचमेऽभूत्। षष्ठे तु सृयोमनखोपपन्नः। मोस्मृदंशाम चेतनत्वितास्य ममा
सि चेतः त्वया शनास्वादनमष्टमे स्यात् स्पर्शोपरोधम नवमाऽरतिश्च। मातिनिरुध्य दिन प्रसीदते

गर्भोऽर्द्धमासे दशास्रस्तते। आचार्यस्य बहुमतस्य मानमसिमतमिति॥ भवति शुभाशुभं च मासाधिमते
स्य दशायां। गर्भस्य मासाधिपतिस्य दशायां शुभं शुभं फलं भवति। एतदुक्तं भवति। आधानकाले यो ग्रहो निपि
डितो भवति स तन्मासे गर्भस्य मासाधिपः। एते कलुषे मंदरश्मो विवर्णे पीडनं निर्मलं सुजालसंप
न्ने बलवति पुष्टिरिति। तथा च स्वल्पजातके। कलुषैः पीडा पतनं निपीडितैर्निर्मलैः पुष्टिः। अन्ये शास्त्र
कारे विशेषमुक्तः। तद्विचित्र प्रदर्श्यते। तत्र च सारावल्यां। तत्र तत्र शुभाशुभमिश्रैः कर्मभिरधिवासि
विषयवृत्तिः। गर्भावस्थो निपतति संयोगे शुक्रशोणितयोः। मिथुनस्य मनोभावो यादृग्मदलालस्य
संभवति। श्लेष्मादिनिस्वादाधिक्यत्तुल्यगुणनिषक्तस्या याद्रूपति। सोम्यस्तत्तुल्यगुणं सुतं समा
धत्ते। पितृजननीमादृशां दावः शशांकस्यबलयोगात। सुबोधमेततत॥ ठ॥ अधुना आधिकां गमूक विर
लगिरां संभवाया गात्वं शास्त्रे नाह॥ त्रिकोणगात विबाले स्तथा पापैर्मुखांघ्रि द्विहास्तैद्विगुणस्तया॥
भवेत्। अवाग चांदाव सुनिर्भन्मं धिगोस्थ भेक्षितश्चेत् कुरुते गिरं विरात्॥ ७॥ बुधे त्रिकोणगल
ग्नात्रवमस्थे पंचमस्थे वा ततस्तस्मात् बुधादन्यैरपापैः सर्वग्रहैर्यत्र तत्रावस्थिते विबाले वा ध
हीते मुखांघ्रिहस्तद्विगुणो गर्भो वाच्यः॥ द्विशिरश्चतुष्पादश्चतुर्भुज इति त्रिकोणगत इत्यत्राकविन्द ४५

स त्रिकोणगबुधे कन्यागाता। इत्याद्यं। तत्रायुक्तं। यस्माद्भगवान् गार्गिः। बलहीने शुभदैः सार्वैर्नवपंच
मन्नागबुधाद्द्विगुणांघ्रिहस्तो द्विशिरा राजवात्यको दरस्तदा। अथवा गिति। गवि वृषस्थिते इंदौ चंद्रे अम्सु
न्तःपापैर्न्यांघ्रिगोः। कर्कटवृश्चिकमीनांतगातेः अमषांशस्य नवांशगातेः यथासंभवं पापैर्वरिवां
सस्थैः अथवा कूमूको गर्भस्थो वाच्यः। शुभैर्न्हित इति। चच्छुष्टोपधार्य एवं विधे योग यदि शुभैर्न्हित
त्सोम्यग्रहदृष्टश्चेद्रो भवति। तदा जातस्य चिरात्। बहुना कालेन गिरं वाचं कुरुते। अर्थादेव पाप
वाल्हतेवाधीनः। इति मिश्रग्रहैर्वीक्षिते यदा सोम्या बलिनस्तदा चिरेण कालेन लब्धवाग्भवति। यदा पा
पा बलिनः स्तदा नैवेति। अत्र भगवतान् गार्गिः। कुलिरालि झषांतस्थैः पापैः श्चंद्रे दृष्टो पागोह
कः पापैर्न्हिते सौम्यैः चिरेणालभते गिरं। मिश्रदृष्टे ग्रहबलान्मूकोऽवाक्किरादपि॥ ठ॥ अधुना स्तदंत
कुब्जजरन्नम्योगान्मंदाक्रांतयाह॥ सौम्यर्क्षांशे रविजरुधिरौ चेत्सदंतोऽत्र जातः कुब्जः स्वर्क्षे शशि
नितनुगे मंदमाहेयदृष्टे पंगुर्मीने यमशशिकुजैर्वीक्षिते लग्नसंस्थे पापयशशिन वजडः स्थे
स्यात्र चेत्सौम्यदृष्टः॥ १८ रविजः शनैश्चरः। रुधिरोऽङ्गारकः। यत्र यत्र राशौ शशिनिश्चरांगारकौ सौ
म्य क्षांशि बुधं राशिनवांशावा भवतः। अथवा बुधात् मिथुनकन्ययोरन्यतमे स्थितो भवतः। चेछशे

यधार्थ। यदेवंतदत्रास्मिन्योगेसदंतोदंतसहितोगर्भस्थोवाच्यः॥ केचनसौम्यहोरेशोमिथु
नेमिथुनांशकन्यायांकन्यांशेवक्तीच्छंति। तत्तांशयोर्युगपद्ग्रहणात्। अंशशब्देनकेवलेनसिद्धि
स्यात्। रूक्षग्रहणमितिरिच्यतइति। एवंविधेयोगेगर्भस्थःसदंतोभवति। नातोवक्तुंशक्यःयदीश
ति। शशिनिस्वर्क्षेआत्मीयेराशौकर्कटस्थितेतथाभूतेतनुगतलग्नगतेतथाभूतेमंदमाहे
यदृष्टेवंदेएवंविधेयोगगर्भस्थःकुब्जोवाच्यः। पंगुमीनलग्नमांत्यमित्रशशीकुजेवाद्धिलेशनि
दंइन्दुमिराराशिर्दृष्टेपंगुःपादविकलोगर्भस्थोवाच्यः। संधवितिपापैःआदित्यकुजसौराणामन्य
तमाःशशिनिवांद्रसंधौकर्करवृश्चिकमीनानांत्यनवांशेगेर्यथासंभवंगर्भस्थोजडाज्ञात्रविद
नोवाच्यः। [illegible] ॥ नात्रसौम्यदृशः। एतेयोगाकर्त्रारोग्रहायथादर्शितानात्रयदिसौम्यैर्युत
गाहेदृष्टाभवंति। तादृतयोगचतुष्टयंध्रुवंविकृत्यां। सौम्यैर्बलिभिर्निरीक्षितायोगाएवनभवंति
मध्यदेवेबलिहीनबलैर्वादृष्टाःअसमग्रफलाभवंति॥ छ॥ अधुनावामनहीनांगयोगौदोधके
नाह। सौरशशांकदिवाकरदृष्टेवामनकोमकरांत्यविलग्नाधानवमोदयगैश्चदृक्काणैःपापयु ४६
तैरभुजांघ्रिशिराःस्यात्॥ २९॥ विकरोत्पदेविलग्नेमकरराशेःपांतनवांशेकविलग्नास्थेनवमनवां॥

शकउदयमानःसचमकरस्येत्यर्थः। तस्मिंश्चसौरसशांकदिवाकरदृष्टेसौरःशनैश्चरःशशांकश्चं
द्रःदिवाकरःसूर्यःएतैरवलोकितोवामनकोगर्भस्थोवाच्यः। नवमोदयगैरिति॥ अत्रकेचिद्व्याचक्ष
ते। तदालग्नेद्वितीयदृक्काणोदयोभवति। तदातस्यपंचमराशिसंबंधित्वाद्वितीयदृक्काणइत्याख्या
तस्मिन्द्वितीयदृक्काणेपापग्रहयुतेउदयमनुप्राप्तेनवमेत्यर्थः। तस्मिन्सौरससीकदिवाकरदृ
ष्टेगर्भस्थोभुजोभुजविहीनोवाच्यः। एवंयदालग्नेतृतीयस्यदृक्काणस्यउदयोभवति। तदातस्यनवम
राशिसंबंधित्वान्नवमदृक्काणइत्याख्या। तस्मिन्नुदयगतेपापयुतेसौरशशांकदिवाकरदृष्टेगर्भे
अनंघ्रिःपाददहीनोवाच्यः। एवंप्रथमस्यद्रेक्काणस्यलग्नसंबंधित्वादुदयदृक्काणइत्याख्या। तस्मिन्नु
दयगतेपापयुते।सौरशशांकदिवाकरदृष्टेअशिराःशिरोवर्जितःगर्भस्थोवाच्यः॥ एतेषुयोगेषुसौ
रशशांकदिवाकराणांदर्शनेयोगात्पापयुक्तइतिकेवलेनांगारकएवयुक्तेयोगोभवति। अत्रांगनि
ष्टानवमोदयगैर्दृक्काणैःपापयुतैःकेवलामवाभुजांघ्रिशिरस्कासंभवंव्याचक्ष्यते। सौरशशांकदि
वाकरदृष्टेइत्यस्यार्थेनेच्छंति। अन्येविभुजादिसंभवेयथासंभवंव्याख्यांत्युक्तान्दृक्काणान्स्रेषिःदृक्का
णतद्भवतिकल्पमाहुः। विभुजोवाच्यंद्विर्वाविशिरावाचेति। अन्येवाव्यचक्षते। यथालग्नेयदाप्रथम

।काणोदयो भवति। तदा पंचमापि राशौ प्रथमाद्द्रेष्काणान्नवमपि प्रथम एव। एतत् द्रेष्काणत्रयं य
दि पापयुतं भवति। तदा गर्भस्थोऽनुजहीनो वाच्यः। अथ यदि लग्ने द्वितीयाद्द्रेष्काणोदयो भवति तदा पंच
मनवमयोरपि द्वितीय एव भवति। एतत् द्रेष्काणत्रयं यदि पापयुतं भवति। तदा गर्भस्थो विशि
रः शिरोहीनो वाच्यः। अत्राप्यन्यथा संख्यं त्र्यंशका त्रिःप्रकारेति यागजनां द्विशिरोहीनानां विकल्पेन ग
र्भस्य भंगं नवमांशः। वयं पुनर्ब्रूमः। निषेककाले यः पंचमराशौ यो द्रेष्काणः। मध्ये गारकेण युतः। सौ
रशशांकदिवाकरदृष्टश्च भवति तदा विभुजो भवति। एवं नवमे स्थाने द्रेष्काणो नवमाद्द्रेष्काणः। त
था निषेककाले नवमराशौ याद्द्रेष्काणः मध्ये गारकेण युक्तः। सौरशशांकदिवाकरदृष्टश्च भव
ति तदा अनंघ्रिर्भवति। तथा निषेककाले लग्नात्स्थाद्द्रेष्काणो यदा सौम्ययुतो भवति। सौरशशांकदि
वाकरदृष्टश्च भवति तदा विशिरा भवति। एषैव व्याख्या साधुः। यस्माद्भगवान्गार्गिः। लग्नद्रेष्काण
गो भौमः। सौरसूर्येंदुवीक्षितः। कुर्याद्विशिरसं दृष्टाः। विभुजांघ्रिमस्तकः स्यात्क्रमनिरविविंदुवादृ
ष्टः॥ ७॥ अथ विकलयजन्मतानां। हरिणाह॥ रविशशियुते सिंहे लग्ने कुजार्किनिरीक्षिते। नयनर
हितः सौम्यासौम्यैः सबुद्बुदलोचनः। व्ययगृहगतश्चंद्रो वामं विहंत्यपरं रविर्नशुभगदितायाः ४७

गा याप्या भवंति शुभेक्षिताः॥ २०॥ रविशशियुते इति॥ सिंहे लग्ने रविशशियुते अर्कचंद्राभ्यां संयुक्ते तथा
ते कुजार्किनिरीक्षिते। भौमसौराभ्यां दृष्टे नयनरहितो नेत्रहीनो गर्भस्थो वाच्यः। अर्थादेव सिंहल
ग्ने रविशशियुते केवले नार्केणायुक्ते सौरांगारकेण दृष्टे दक्षिणाक्षिकाणः। एवं सिंहलग्ने केवले
न चंद्रेणायुक्ते सौरांगारकदृष्टे वामाक्षिकाणः। सौम्यासौम्यैः सबुद्बुदलोचन इति। तस्मिन्नेव सिंह
लग्ने अर्कचंद्राभ्यां युक्ते सौम्यासौम्यैः शुभाशुभग्रहैर्दृष्टे गर्भस्थः सबुद्बुदलोचनः पुष्पिताक्षो वा
च्यः। अत्राप्यकतमयुक्ते प्राग्वत्पुष्पिताक्षिः। व्ययगृहगत इति निषेककाललग्नाद्द्वादशोपरं च
न्द्रो हिनस्ति। अशुभगदितायाया गा इति। य एते योगाः प्रागभिहितास्त्रिकोणगेहेत्यादिना ग्रंथेन अशु
भाशुभफलप्रदास्तेषां सर्वेषामेव योगानां यदा योगकर्त्ताराग्रहा यदा शुभग्रहैर्दृष्टा भवंति। तदा
ते योगा याप्या भवंति। प्रसंख्यफलं न प्रयच्छंति किंचित्प्रयच्छंतीत्यर्थः॥ ७॥ अथाधानकालवि
ज्ञानं। प्रसवकालस्थानं वसंततिलकेनाह॥ तत्कालमिंदुसहितो द्विरसांशकोदयस्तत्तुल्यराशिस
हिते पुरतः शशांके। यावानुदेति दिनरात्रिसमाननागस्तावद्गते दिननिशोः प्रवदंति जन्म॥ २१॥
तत्कालं आधानकाले अर्थ्रकाले वा यस्मिन्राशौ चंद्रमा वर्तते। तत्र च यस्मिन्द्वादशभागे व

वस्थितः। तत्कालमिंदुसहितो द्विरसांशको इति केचित्तु तत्कालिकेंदुसहितो द्विरसांशक इति पठंत
तत्काले इंदुर्यावत्संख्यो द्वादशभागः सहितस्तत्तुल्यस्तत्संख्यो मेषादौ गणनया यो राशिस्त
त्रास्थे चंद्रमसि पुरतो दशमे मासि गर्भस्य प्रसवो वाच्यः। इति केचित्। तथा च सारावल्यां॥ य
स्मिन् द्वादशभागे गर्भाधानात् व्यवस्थितश्चंद्रः तत्तुल्ये प्रसवं गर्भस्य विनिर्दिशंत्याचार्याः॥ अन्ये पु
नरेवं व्याचक्षते। आधानकाले यत्र राशौ चंद्रमा व्यवस्थितस्तत्र यावत्संख्यो द्वादशभागो वर्तते तात
स्माद्द्वादशभागराशेस्तावत्संख्य एव पुरतो यो राशिस्तत्रस्थे चंद्रमसि दशमे मासि प्रसवो वक्तव्यः। ए
षैव व्याख्या साधुः। यस्माद्भगवान्गार्गिः॥ यावत्संख्या द्वादशांशा शीतरश्मिर्व्यवस्थितः। तत्संख्ये यस्त
तो राशिर्जन्म तौ तद्वते वदेत्। अत्रापि नष्टजातकानयने यमनुपातः। यदि चंद्राक्रांत द्वादशभाग प्रमा
णेन सकलश्चंद्रराशी रष्टदशशत प्रमाणो लभ्यते। तदा तिन्नलुक्त द्वादशमा ह। यावानुदेति। दि
नरात्रिलग्नाः पूर्वं व्याख्याताः। गोजाश्चिकर्कि मिथुना। इत्यादिः॥ आधानकाले प्रश्नकाले वा यल्लग्नं तस्य
यः प्रविभागो दिनसंज्ञो रात्रिसंज्ञो वा यावानुदेति स्वमानाद्यावत्कालभागो गतस्तावत्येव दिननि ४८
शोः स्वमानात् ऋते काले जन्म भविष्यतीति वक्तव्यं। एवं दिनस्य रात्रेर्गतकालं बुध्वा प्रसवकाले लग्न

ग्नाराद्द्रेष्काणनवांशकद्वादशभागत्रिंशांशका वाच्याः। अत्र ये प्रवदंति। कथयंति। तेषां तद्वाक्यं। सा
रावल्यां॥ तत्कालं दिवसनिशासंज्ञः समुदेति राशिभागो यः। यावानुदयस्तावान्वाच्यो दिवसस्य रात्रे
र्वा इत्याधाने प्रथमं स्मृतिकालस्तु निश्चितं तत्वाजातक विहितं च विधिं विचिंत्य यत्नेन गणितज्ञः॥
॥८॥ अधुना धृतस्य गर्भस्य वर्षत्रय वर्षद्वादशान्तानं मालिन्याह॥ उदयति मृदुभांशे सप्तमस्थे च
मंदे यदि भवति निषेकः सूतिरब्दत्रयेण। शशिनि तु विधिरेष द्वादशाब्दे प्रकुर्यान्निगदितमिह चि
तं सूतिकाले पि युक्त्या॥२१॥ उदयतीति॥ मंदो सौरस्य भांशे मृदुभांशे निषेककाले यस्य तस्य लग्न
श्री उदयो मृदुभांशे नि स्थिरराशिनवांशके मृगांशके कुंभांशके वा उदयति तथाभूते तस्मादपलग्नान्मं
दे शनैश्चरे तत्काले सप्तमस्थे भून गात। एवं विधे योगे यदि निषेको भवति आधानं। तदा धृतस्य
ष्टत्वतये न वर्षत्रये न ये सूतिः प्रसवो वा वाच्यः। शशिनीति। एष। एवं विधिर्यदा शशिनि चंद्रे भवति
तदा द्वादशाष्ट द्वादशे वर्षे प्रसूतिः प्रसवं कुर्यात्। एतदुक्तं भवति। यस्य तस्योदयो यदा क
र्कटांशकोदयो भवति। तस्माल्लग्नात्सप्तमश्चंद्रो भवति। तदा धृतस्य गर्भस्य द्वादशाष्टे प्रसवो
वक्तव्य। निगदितमिदेति। इदास्मिन्नाधानाध्यायेऽ आधानकालाद्यागवशाद् घटीनाधिका ने
॥२२॥

अंगादीनां गर्भस्थं जन्मनो भवति प्रसूतिका॥ ते पितादृग्योगवशात्तथाविधमेव जन्म वक्तव्यं। पितृ
मातृपितृव्यमातृष्वसृणामपि शुभाशुभं जन्मकाललग्नवशात्तदनंतरमपि वक्तव्यं। युक्तमिति। य
त्र संभवति तत्र वक्तव्यं। गर्भश्रवणादि गर्भप्रसवकालनिर्देशादिति एवं आधानकालात्प्रस
वकालाद्वा यथोद्दिष्टं तत्तथा तस्मादि कालादपि वक्तव्यः। उक्तं च जन्माधानकाले भवति॥ ७॥
इति भट्टोत्पलविरचितायां बृहज्जातकविवृतौ निषेकाध्यायश्चतुर्थः॥ ४॥ ॥७॥ ॥ अथातो जन्म
विधिर्नामाध्यायो व्याख्यायते॥ तत्र दावेव पितुः सन्निधानं असन्निधौ वा जात इत्यनुष्टुभमाह॥ पि
तुर्जातं परोक्षस्य लग्नमिंदावपश्यति। विदेशस्थस्य चरभे मध्याद्भ्रष्टे दिवाकरे॥ इंदौ चंद्रे
लग्ने अपश्यति पितुः परोक्षस्य जन्म कस्यासन्निधौ नात स्तत्र पितुरसन्निधाने स्वदेशपरदेश
स्थिते बालानार्थमाह। विदेशस्थस्येति दिवाकरे सूर्ये चरराशिस्थे मध्य दशमस्थानात् भ्रष्ट
पतिते एकादशाद्वादशस्थे नवमाष्टमस्थानस्थिते पितुर्विदेशस्थस्यान्यदेशगतस्य जातः। चंद्र
मसि प्रसवलग्नमपश्यत्येष योगो नान्यथेति। चंद्रे प्रसवलग्नमपश्यति अर्के स्थिरराशौ स्थिते ४९
पितुर्विदेशस्थस्यान्ये मध्यभ्रष्टे स्वदेशस्थस्यैव पितुः परोक्षजातः। अस्मिन्नेव योगेपि द्विस्वभा

यमलौ...

६१

वस्थे अर्के मध्यभ्रष्टे स्वदेशपरदेशयोर्मध्ये पथिस्थितस्य परोक्षे जातः। अर्थादेव चंद्रे प्रसवलग्नमप
श्यत्यर्के चरराशिस्थे स्थिरराशिस्थिते वा द्विस्वभावराशिस्थे वा मध्यभ्रष्टे वापि पितुः स्वदेशस्थस्यै
व परोक्षे जन्म इति वक्तव्यो। तथा च सारावल्यां॥ शमनिषमाह्ने पितरि न गेहस्थे ते शनिनि जातः।
मेषुरामेषु राणामुते वा चरगे भानौ विदेशगते॥ ७॥ अथान्यानपि योगाननुष्टुभाह॥ उदयस्थेपि
वा मंदे कुजे वास्तं समागते। स्थिते वांतः क्षपानाथे शशांकसुतशुक्रयोः॥ २॥ मंदे सौरे उदयस्थे लग्ने
गते पितुः परोक्षस्य जातः। अथवा कुजे भौमे जन्मलग्नादस्तं गते सप्तमं स्थानं समागते तथापि पि
तुः परोक्षस्य जात इति। क्षपानाथे चंद्रे शशांकसुतशुक्रयोर्मध्यस्थे शशांकसुतौ बुधशुक्रौ तयोर्मध्ये
... नागर्वं अन्ययोर्मध्यस्थिते चंद्रे द्वादशको द्वादशो द्वितीयो द्वितीये अथवैकस्मिन् राशिमध्ये
नागेषु चंद्रस्थितेः। आहुस्तन्नागाया बुधशुक्रौ तथापि मध्यस्थ एवंविधे योगे पितुः परोक्षस्य जातः॥
तथा च स्वल्पजातके॥ चंद्रे लग्नमपश्यति मध्ये वा सौम्यशुक्रयोश्चंद्रे। जन्म परोक्षस्य पितुर्यमाद
ये वा कुजे वास्ते॥ ७॥ अधुना सर्पावेष्टितनालानि अनुष्टुभमाह॥ शशांके पापलग्ने वा वृश्चिकेशत्रिभा
गगे॥ शुभैः स्वायस्थितैर्जातः सर्पस्तद्वेष्टितोपि वा॥ ३ वृश्चिकेशो वृश्चिकस्वामी भौमः शशांके चंद्रे

॥अंके यो शस्त्रेनागात्। शुभैः स्वायस्थिते भवति। द्रेष्काणाः मेषप्रथमः। कर्कटद्वितीयः। सिंहे तृती-
यः। वृश्चिके प्रथमः धनुषि द्वितीयः। मीने तृतीयः। एषामन्यतमस्थस्य चंद्रमसः शुभैः शुभग्रहैः स्वा-
यस्थिते द्वितीये कादशस्थानस्थिते सर्पकुरंगो जात इति वक्तव्यं। पापलग्ने वेति एवं पापग्रहसं-
बंधि लग्नोदये यदा सौम्यद्रेष्काणो भवति तत्र पापसंगात् सौम्यद्रेष्काणाः। मेषस्य प्रथमः कर्कट-
स्य द्वितीयः। वृश्चिकस्य प्रथमः। एषामन्यतमस्योदये लग्नात् शुभग्रहैरेकादशस्थितैस्तद्दृष्टि-
सर्पावेष्टितो जंतुर्जायते इति वक्तव्यं॥ अन्ये पुनरेवं व्याचक्षते। चंद्रे पापलग्ने वा सौम्यद्रेष्काणस्थि-
तस्मादवशुभग्रहैः स्वायस्थितैर्विकल्पेन सर्पो वा सर्पावेष्टितो वा जात इति। अत्र पूर्वव्याख्या सा-
धु। यस्माद्भगवान् गार्गिः। सौम्यद्रेष्काणगे चंद्रे सौम्यैरायधनस्थितैः। सर्पस्तद्दृष्टितस्तद्वत्पाप-
लग्ने विनिर्दिशेत्। तथा च सारावल्यां॥ सौम्यद्रेष्काणगतेंदौ लग्ने वा संस्थिते वादज्ञातं द्विकादशा-
गैः सौम्यैरायधनस्थितैः। सर्पस्तद्दृष्टितस्तद्वत्पापलग्ने विनिर्दिशेत्॥ तथा च सारावल्यां॥ सौम्यद्रे-
ष्काणगतेंदौ लग्ने वा संस्थिते वादज्ञातं द्विकादशगैः सौम्यै रहिवेष्टितको भुजंगो वा॥ ५॥ अधुना ५
जरायुवेष्टितयोर्द्वयोर्जन्मज्ञानमनुष्टुभाह॥ चतुष्पदगते भानावन्ये वीर्यसमन्विताः। वितनुस्थैश्च

२५

यमलौ भवतः कोशवेष्टितौ॥ भानौ सूर्ये चतुष्पदराशिगते मेषसिंहधन्वपरार्द्धमकरपूर्वार्द्धाना-
मन्यतमास्थस्ताद्वेरन्यैः सर्वग्रहैर्वितनुस्थैर्द्विस्वभावराशिस्थितैश्च वीर्यसमन्वितैर्बलसंश्च
का॥ शावष्टितावुजन्यायुवेष्टितौ यमलौ जनयेत्॥ ६॥ अधुना नालावेष्टितजन्मज्ञानमनु-
माह। छागस्थितेह वृषे लग्ने तत्स्थे सौरे अथवा कुजे। राश्यंशसदृशे गात्रे जायते नालवेष्टितः॥ छागो
मेषः केसरी सिंहः प्रसिद्धो वृषो वृषभः। एतैः छागसिंहवृषैर्लग्नगतैरेषामन्यतमो यदि लग्नगतो
भवति। तत्स्थे सौरे अथवा कुजे तस्मिन् छागसिंहवृषाणामन्यतमे लग्नगते तत्स्थे तत्रस्थिते सौ-
रे शनैश्चरे अथवा कुजे भौमे तत्रस्थिते नालवेष्टितो जंतुर्जायते॥ नालशब्देन नाभिरभिधीयते॥ कस्मि-
न्नंगे वेष्टित इत्याह॥ राश्यंशसदृशे इति। राशेर्योऽशो नवांशः स राश्यंशः। राशेर्लग्नस्य नवांशस्तत्कालमुदि-
तः भवतु यद्राशिसंबंधी स च राशिर्यस्मिन्नंगे कालपुरुषस्य व्यवस्थितः कालांगानीत्यादिना ग्रंथे-
न निरूपितः। तत्सदृशे तस्मिन्नेवांगे नालावेष्टित इति वक्तव्यं। तथा च सारावल्यां। सिंहाजगान-
रुदाय स्थिते नालेन विष्टितो जंतुः। लग्ने कुजे यसौरे राश्यंशसमानगात्रेषु॥ ७॥ अथ यज्जारजातं वंश-
स्थेनाह॥ न लग्नमिंदुं च निगुरुर्जीवो लग्नमुदयमिंदुं चंद्रं न नीरीक्षते न पश्यति। लग्नं च इंदुश्चापि करा-

गा.त.न.

स्थोऽप्यकस्थो वा यदीनाविगुरुणा न दृश्यते। तदा परेण जात इति निश्चयात् प्रवदंति कथयंति मुन
यः। अत्र यदा लग्नं चंद्रो जीवभागस्थो न भवति तदा न परजात इति वक्तव्यं। यस्माद्यवनेश्वरः अजीव
भागगतो गे पुनरीक्षितो वा प्रस्यंतारव्यनवस्थितेवा। जीवेऽथ चंद्रेक्षित लग्नगे वा जातं पाराज्जनमि
ति ब्रुवंति। वा व्योतज्ञो वा व्यवसायवलोकादिति। नवा शशांकमिति शशांकं चंद्रं रविणार्केण समा
गतं गुरुन निरीक्षते चंद्रार्कौ विकराशिस्थो यदि बृहस्पतिना न दृश्यते तदा परेण जातः। अथवा
शशी चंद्रः सपापः पापयुक्तो द्रेष्काणो म नामा सौरेण वा युक्तस्तथा विधोऽर्केण सार्येण यदि युक्तो
भवति तदा परेण जात इति॥ अत्राप्येके जीवदृष्ट्यानुवर्त्य व्याख्यानं कुर्वंति न दृयुक्तं। यस्माच्चंद्रा व
र्कौ विकराशिगतौ पापयुक्तौ वा युक्तौ वा जीवेनादृश्यमानौ जारजातकजन्मकारौ तत्र चंद्रोऽर्कयो
गः। पापेन समेत्य किं तं भवेत। तस्माच्चंद्रार्कौ विकराशिगतो अपापो जीवेनादृश्यमानो
सपापो जीवेन दृश्यमानो यदृश्यमानो वा जारजातकजन्मकारो निश्चयाद्भवत्येव भवतः। अत्र
चंद्रमा यदि गुरुर्बृहस्पति दृष्काण तत्रवांशक द्वादशभागत्रिंशांशगस्थो न भवति। अन्यत्र वा राशौ
गुरुणा युक्तस्तदा न जारजात इति। यस्माद्भगवान् गार्गिः। गुरुक्षेत्रगते चंद्रे तद्युक्ते वान्यराशिगे। ५१

ताद्दृक्काणे तदंशे वा न परिर्जित दृष्यते॥ ७॥ अथ जातस्य पितृबंधनयोगज्ञानं विज्ञानीयेनाह। क्रूरर्क्षग
तावशोभनौ सूर्याद्द्यूननवात्मजस्थितौ। बद्धस्तु पिता विदेशगः स्ववा राशिवशाद्द्योपथ्यि॥ ७॥ क्रूरक्षी
तावशोभनौ सूर्याद्द्यूननवात्मजस्थितौ। बद्धस्तु पिता विदेशगः लग्ने वा चंद्रे कर्कटः पापयुते बुधेपि कन्य
णि क्रूरग्रहराशयः मेषसिंहवृश्चिकमकरकुंभाः लग्नेपि चंद्रे वा र्यात् स्वर विधूननवात्मजस्थि
मिथुनावशोभनौ पापौ शनिभौमौ क्रूरर्क्षगतौ पापक्षेत्रस्थितौ वसूर्यात्स्वर विधूननवात्मजस्थि
तो द्यूनं सप्तमं नवमं प्रसिद्धं आत्मजस्थानं पंचमं एषामन्यतमस्थो भवतस्तदा जातस्य पितृ नक्षे व
तो द्यूनं सप्तमं नवमं प्रसिद्धं आत्मजस्थानं पंचमं एषामन्यतमस्थो भवतस्तदा जातस्य पितृ
द्धो वाच्यः। तस्यादित्यक्रांतराशितशाद्बंधनाद्देशस्थानमाह॥ स्ववा राशिवशाद्दयोपथ्याति। वर राशि
द्धो वाच्यः। तस्यादित्यक्रांत राशितशाद्बंधनाद्देशज्ञानमाह॥ स्ववा राशिवशाद्यथापथि॥ एवं राशिस्थानपरिज्ञानं॥ अथे
स्थिते धर्षपरदेशोबद्धः स्थिरराशिस्थे स्वदेशे द्विस्वभावे पथि॥ एवं राशिस्थानपरिज्ञानं॥ अथे
इति अयं निपातो विकल्पे क विस्ववा राशिवशात्तथा पथ्याति पठंति॥ ८॥ अधुनापातगतप्रसव स
नं विज्ञानीयेनाह॥ पूर्णे शशिनि स्वराशिगा सौम्ये लग्नगते शुभे सुखे। लग्ने जलाम स्ताग पिवा चं
दे पोतगता प्रसूयते॥ ८॥ शशिनि चाद्दपूर्णेपि परिपूर्णमंडले तस्मिं यस्वराशिगा कर्कस्थ तथा सौम्ये
बुधे लग्नगते उदय शुभे नावेउदयात् सुखे चतुर्थे स्थिते पोतगता नौस्था प्रसूयते। इति वक्तं
तं तत्रान्यशुभैः सुखे इति पठंति। पतिवा विवं वा व्यस्यते। शुभे सुने चतुर्थे भवने शुभैरिति बद्ध

न वनं न घटते। लग्ने बुध उक्तः शुक्रबृहस्पती॥ राशौ॥ शुभाशुभमित्येवं प्राप्नोति यत्क्रियते। तस्मादेवमस
यात। पूर्वं चंद्रमा बृहस्पतिशुक्राभ्यां युक्तो भवति। तदा शुभैरिति भवति॥ एतच्च मेषलग्ने तत्रस्थे बुधप
श्यं चंद्रे शुक्रबृहस्पतिभ्यां युक्ते कर्कटस्थे संवयुज्यते। इति। अयं पाठः सद्व्याख्याने न युक्तः। यस्मान्म
करावस्थितेऽर्के कर्कटस्थे चंद्रमा प्रायो न भवति। मकराद्यवस्थिते चार्के मकराच्चतुर्थे स्ववने मेषे बु
धस्य संभवो नास्ति किं पुनर्मकरात्सप्तमराशौ कर्कटे। कर्कशुक्रस्यावस्थानमिति तस्माच्छुभे चार्के सु
खेति सप्तम्या एकवचनांत एव पाठो न्याय्यः। शुभे सुखे तत्र कथं जीवो व्याख्यातस्तदुच्यते॥ बुधे लग्नगते तत
स्माच्छुक्रस्य चतुर्थस्थाने संभवो न भवति॥ अतो जीव इति व्याख्यातं केचित्तत्सर्वशास्त्रानुसारेण त
शुक्र इच्छंति। अथोपायं पोत। ~~तस्माच्छुक्रस्य~~ गता प्रसवतानयोगाद्द्वितीयः। लग्ने ... न ल इति। लग्नेऽज
ले राशौ वसक्र यथाई कर्कटमीनानामन्यतमे तस्मादस्तसप्तमस्थानस्थे चांद्रं प्राशी वा प्राशीव
योतगते वप्रसूतनैयथते॥ इवा राष्टः प्रकारांतराय॥ अथोदकमध्यप्रसवतानं विताली यनादृ।
अथोदयमाप्यगतः शशी संपूर्णः समवेक्षते न थवा॥ मेषुरणबंधुलग्नगः स्यात्प्रसूतिः सलिले न सं ५२
शयः॥ आप्योदयमिति॥ आप्यराशयो मकरपश्चिमार्द्धं कर्कटमीनाः॥ तेषामन्यतमस्योदये तथा

... अलिके धनुर्धरा ... कुंभस्य ... पतन ...
उष्ट्रीबं धनागारप्रसवे ति वक्तव्या (...) ... ते थवेति। अथवा संपूर्णः
चं ८ ८ ...
मवान्यतमस्मास्थिते चंद्रे तोये प्रसूतिरिति वक्तव्यं। संपूर्णः समवेक्षते थवेति। ... सलिलसमीपे प्रसूतिः। मेषुरणबंधुलग्न
शशी लग्नमाप्योदयं समवेक्षते। पश्यति। तथापि ... मेषूरणादशमे बांधे व चतुर्थे लग्ने
इति। अथवाप्यराशावुदयगते शशांके मेषूरणबंधुलग्नगः। मेषूरणादशमे बांधे ... तथाच सारावल्यां॥ सलिलस्थ
५॥ धालग्ने दास्थित स्याद्भवेत्तथापि सलिले प्रसूतिरिति वादतः। तथाच सारावल्यां॥ सलिलविधा दंधूदयदशमगश्चयदा॥ ८॥ अधुनाव
ग्नस्थे द्रोन लराशौ वीक्षते थसंपूर्णः प्रसवं सलिलविधा दंधूदयदशमगश्चयदा॥ ... गुप्ती पापनिरिक्षिते य
धनागारवटयोः प्रसवतानं वितालीये नाह॥ उदयोडुपयोर्व्ययस्थिते गुप्ती पापनिरिक्षिते य
धनागारवटयोः प्रसवतानं वितालीयेनाह॥ उदयोलग्नं उडुपश्चंद्रस्तयोरुदयोडु
पयो। अलिककर्किंयुते विलग्नगोमोरेक्षितकरेक्षिते वटे॥ १० उदयोलग्नं उडुपश्चंद्रस्तयोरुदयोडु
पयो। ... व्ययगतोसौरेव्ययस्थिते द्वादशस्थे तस्मिंश्च पापानिरीक्षिते चंद्र विलोकि
तेर्वटे श्वत्ते प्रसूतातिवक्तव्यं॥ ८॥ अथ क्रीडागृहदेवालयागृहदेवालयायामाषरत्नपादशेषु॥
प्रसवतानं वितालीये नाह। मांदश्च गात विलग्नागबुधस्तर्यं दुनिरीक्षिते इति। विलग्नगेऽत्रा
मेषे आगूय्स्थेऽक्रमात्परिपाघा बुधस्त्यं दुनिरीक्षिते क्रीडाभवने सुरालये सोषरत्नमिषुस
प्रसूयतशालि वक्तव्य। एतदुक्तं भवति। शनिश्चारजलराशिस्थे लग्नगते बुधनारीक्षिते बुधद
प्रस्तयतशालि वक्तव्य। एतदुक्तं भवति। शनिश्चारजलराशिस्थे लग्नगते बुधनारीक्षिते बुधद

क्रीडानवने रतिगृहे प्रसूतिः। एवं सूर्येण दृष्टे एणनिशान्विते सुरालये देवगृहे इंदुना चंद्रेण निशान्विते
सोषरभूमिषु मनवालुकास्थवनिषु प्रसूते तिवक्तव्यं॥ ॥ अथ श्मशानरम्यप्रदेशशालानृपादवगृह
गोकुलशाल्यालयप्रसवस्थानमुपजात्याह॥ नृलग्नगा पश्यति कुजः श्मशाने रम्ये सितेंदू गुरुरग्निहोत्रे र
विर्नरेंद्रामरगोकुलेषु शिल्पालये ज्ञः प्रसवं करोति॥१२ प्रयश्लोकान्मंद इति अनुवर्त्तते। प्रत्यायमस्या
त्रलग्नेन रराशौ। स्थितो लग्ने प्रसवं ज्ञा न करोति। राशौ लग्ने स्थितः नरराशयो मिथुनकन्यातुलाध
न्विपूर्वार्द्धकुंभाः तत्रगतं शानैश्चरं कुजोंऽगारकः पश्यति दृष्ट्या नो मो यदि पश्यति। तदा श्मशाने प्रसव
जन्म करोति। केचित्तु लग्न दृग्वीक्षितिज इति पठंति नृलग्नं पश्यति तस्थितो नृलग्न दृग्वीक्षितिजः रम्ये
सितेंदू इति। नरराशिलग्नगतं शानैश्चरयुक्तं सितः शुक्र इंदुश्चंद्रो वा पश्यति तदा रम्ये रमणीये प्रदे
शे जन्म। एवंविधं सौरं गुरुर्जीवः पश्यति। तदा अग्निहोत्रे अग्निशालायां एवंविधं सौरं रविरर्कः पश्य
ति तदा नरेंद्रगृहे राजवेश्मनि। अमरगृहे देवागारे गोकुले वा प्रसूतिः। एवमेव बुधे न दृष्टे शिल्पा
लये शिल्पिगृहे विचित्रपुस्तककर्वर्द्धकिप्रभृतीनां शिल्पिनामालये गृहे प्रसूतिरिति वादरा। त
था व सारावल्यां। रविजे जलजे विलग्ने क्रीडागार बुधान्विते प्रसवः। रविणा देवागार न योषारा व ५३

वचांद्रेण। आरण्यं लग्ने गिरिवन दुर्गे तथा न रविलग्ने। रुधिरान्विते श्मशाने शिल्पिकनिलये च सौ
म्येन॥ सूर्येन्विते गोनृपदेववासे शुक्रेंदुजाभ्यां रमणीयदेशे। शक्रेज्य दृष्टे द्विजवह्निहोत्रे नरोद
ये संप्रवदंति सूतिं॥ ॥ ॥ अथ प्रसवादरात्तानं वितालीयेनाह॥ राश्यंशसमानगोचरे। मार्गे
जन्म वारस्थिर गृहे। स्वर्क्षांशगते स्वमंदिरे बलयोगात्फलमंशकर्क्षयोः॥१३ राश्व शिश्चांशश्च तद्रु
रूपे राशिर्लग्नराशिः अंशो नवांशकः लग्नराशिः स्तन्नवांशकस्मवायः समानः स दृशः आत्मीयगोचरे
विषयः स्वव राश्व भावइत्यनेन प्रदर्शितस्तत्र यस्मिन्प्रदेशे यो यो राशिः रूपः प्राणि संचरति तत्र यो
मार्गः पंथास्तस्मिन्जन्म यदि चरादये चरलग्नस्तत्रन्नवांशको वा चरो भवति। अथ लग्न राशि
स्तन्नवांशको वा स्थिरस्तदा राशिरूपतुल्यप्राणिनो यस्मिन्गृहे यत्र सवसः तित्स्थाने राशिरूप
तुल्यप्राणिनो यद्गृहं समीपस्तत्र प्रसवं इत्यर्थः॥ स्वर्क्षांशाइति। वरस्य स्थिरस्य द्विस्वभावस्य राशे
लग्नगतस्य स्वर्क्षांश आत्मीयनवांशकोदयो यदा भवति। तदा स्वमंदिरे आत्मीयगृहे एवं जन्म वक्त
व्यं तत्र राश्यंशसमानागोचारमार्गे जन्म। इत्यादि प्रामान्येनोक्तं। तन्नतायते किं लग्नराशिसमा
नगोचारकिं अंशसमानगोचारमन्यत्र वादकाः क्रियतां तदर्थमयं निश्चयः॥ बलयोगात्फलमंशक

न्द्रयोरिरिः॥ अंशकोनवांशकः॥ अंतं राशिः॥ अनयोर्बलयोगात्फलं प्रसवस्थानतानं एतदुक्तं भवति॥ ल
ग्नराशेर्नवांशकराशेश्च यो बलवांस्तत्समानगोचारे मार्गे गृहसमीपेषु प्रसवो वक्तव्यः॥ अ
त्र च पूर्वोक्तयोगाभावे राशेः समानगोचरे मार्गेनु गृहसमीपेषु प्रसवो वक्तव्यः॥ तेषां संभाव
योगे उक्तप्रसवो वक्तव्यः। अत्र च पूर्वोक्तदेशेषु प्रसवो वक्तव्यः॥ अत्र यस्मिन्योगे जातो मात्रा त्य
ज्यते यस्मिंश्च योगे मात्रा त्यक्तः सुखी भवति दीर्घायुश्च तद्योगद्वयं वितालीयनाह॥ आरार्कजयो
स्त्रिकोणगे चंद्रेस्ते च विसृज्यतेऽबया॥ दृष्टोमरराजमंत्रिणा दीर्घायुः सुखभाक् च स्मृतः॥१४॥ चंद्रे
शनिनिः॥ आरार्कजयोर्भौमसौरेकराशिस्थितयोस्त्रिकोणगे नवमस्थे पंचमस्थे वास्ते च सप्तमस्था
ने स्थिते जातो मात्रा विसृज्यते॥ एवंविधे योगे चंद्रमस्यमरराजमंत्रिणा गुरुणा दृष्टे मात्रा त्यक्तो
पि परहस्तगतोपि दीर्घायुश्चिरंजीवी सुखी भवति॥ ॥ यस्मिन्योगे जातो मात्रा त्यक्तो विन
श्यति तं वसंततिलकेनाह॥ पापेक्षिते तुहिनगावुदये कुजेस्ते त्यक्तो विनश्यति कुजार्कजयोस्त
था ये॥ सौम्येपि पश्यति तथाविधहस्तमेति सौम्येतरेषु परहस्तगतोप्यनायुः॥१५॥ तुहिनगौ ५
चंद्रे पापान्विते पापग्रहदृष्टे सौरेणार्केण वा स्पृष्टः॥ नयान्तरे उदयलग्नस्थिते केंद्रे भौमवास्तस

प्तमस्थानास्थजातिमात्रात्यक्तो विनश्यति। म्रियते। कुजार्कजयोस्तथा ये। तथा तानेव प्रकारेणज
ग्नगते चंद्रे पापान्विते सूर्येण दृष्टे कुजार्कजयोर्लग्नादायएकादशस्थितयोर्जातो मात्रात्यक्तोपि वि
नश्यति म्रियते इत्यर्थः। सौम्येपि पश्यतीति। पूर्वोक्तयोगके चंद्रमसि पापदृष्टे सौम्यग्रहे पश्यति स
ति मा जातो मात्रा त्यज्यते। त्यक्तोपि यादृग्वर्णचतुर्णां सौम्यग्रहेण चंद्रमा दृष्टस्तथाविधस्य हस्तमे
ति तादृग्वर्णस्य ब्राह्मणादेर्हस्तं गच्छति। तेन धार्यते इति जीवति च। अथवास्मिन्नेव योगे स्थितश्चंद्र
पापेन सूर्येण कुजेन सौरेण वा दृश्यते न सौम्यग्रहेण च दृश्यते तदा जातो दृष्टग्रहयोर्याबल
वांस्तादृशस्य ब्राह्मणादेर्हस्तगतोपि विनश्यति। इति अत्रास्ति दितः। तत्र क्षत्रवैश्यशूद्रसंकरादिषु हस्त
गतः सर्व एव विनाशमाप्नोति। बहवश्च मात्रात्यक्ताः क्षत्रियादिहस्तगता वर्णसंकरहस्तगताश्च ज
वमाना दृश्यन्ते। तस्मात्सर्वलोकदृष्टे सुरराजमंत्रिणा दीर्घायुः सुखभाक् च स्मृत इति तदिदं शेषमनूत
मवगंतव्यं। तस्माद्बुधजन्मभुक्तेन वा यथा योगस्थश्चंद्रमा दृश्यते जीवेन न दृश्यते तदा परहस्तगतो
म्रियते। यदा पापेन सौम्येन वा दृश्यमाने जीवे दृश्यते तदा दृष्टग्रहयोर्बलवशाद्वर्णस्य ब्राह्मणाद
र्हस्तगतो जीवति। तथा च सारावल्यां म्रियते च पापदृष्टे शशिनि विलग्ने कुजेस्तगते च॥ लग्ना

स्थलानगतयोर्वसुधमसुतमंदयोरारवा। यद्युपतिसौम्यौ बलवान् यादृग् ग्रक्षाति तादृशो बलवान् जातं सुत।
पापग्रहदृष्टे पार गृहीतो पिमन् म्रियते। सार्वाषवेत यदायोगेषु। शशी सुरज्यसंदष्टः नवति तदादा
र्घायुः दुस्थगतः सर्ववर्षेषु॥ ७॥ अधुना पत्रसंस वगर्द विताध्यायमाह। पितृमातृगृहेषु तद्बलात्तरुशाला
दिषु नीचगेर्ग्रहैः। सुतैः। यदि नेकातिसु वालिंतौ लग्नेंदू विजने प्रसूयते॥ १६ पितृमातृगृहादिवा दिवार्क
शुक्रादिन्यादिनोक्ताः॥ तद्बलात् पितृमातृगृहेषु प्रसूयत इति वादस्व॥ तत्रार्कशुक्रानैश्चरयोरन्यतमेब
लवति पितृगृहं। पितृस्वस्त्पितृव्यादिसंबंधेगृहे प्रसूता। एवं मातृगृहयोश्चंद्रशुक्रयोरन्यतमे बलव
ति मातृगृहे मातृष्वस्रमातुलादिगृहे प्रसूतिः तरुशालादिषु नीचगैः सुतैरिति॥ बहुवचनात् सर्वैर
वसुनग्रहायदि नीचस्थानवंति। तदा तरुषु वृक्षेषु शालेषु प्राकारसमीपेषु प्रसवो वाच्यः। आदिग्र
हणात् नदीकूपारामपर्वतादिप्रवेशेषु नाप्रातिष्विति। यदि नैकगतेरिति। नीचगैः सुतैरित्यनुवर्त्तते। आवी
सुमग्रहैर्नीचगतास्तैर्लग्नेंदू उदयचंद्रावुभावप्येकराशिगतौ ग्राहे बहुवचनात् पृथक्न्ति निर्यदि
न दृश्येते। तदा विजने नरहिते स्थाने अटव्यां प्रसूतिरिति। यदा पुनारकस्थे बहुग्रहे लग्नेंदू दृश्येते
तदा जनाकीर्णे प्रसूतेति। तथा च सारावल्यां। पितृमातृगृहे वार्यतस्वलनगृहेषु बलायागता प्राकार ५५

तरुनदिसु चसूतिनीचाश्रितैः सौम्यैः न संते लग्नेंदू यद्येकस्था गृहान्तदारव्यां॥ ८॥ अधुना दीपसंभवाद्य
वन्नृपत्र देशप्रसवे ताने गर्भपादं मातुः सूतिकालेत्वन्निमित्त केशानमंदाक्रांतयाद्यामंदलांशा। द्वाशि
निहिबुके मंद दृष्टे अजगेवात घुके वातमसिशायनं नीचसंस्थे अस्वापौ। यद्यश्रित्व जति हरिजं गर्भमाहुः
सुल द्वस्या पिश्चद्वाश्मर सुषगतैः कैमाङ्जे नान्याः॥ १७ मंदाक्रांति इति। शशिना चंद्रे यत्र तत्र राशौ मंदत्रिंशांश
निश्वरांशफ नवभाग मकरकुंभयोरन्यतमो शशाकस्थतमस्यंधकारस्तृतिकायाः शायनं वक्तव्यं। हिबुके
लग्नाच्चतुर्थे चंद्रे धकारएव शायनं यत्र तत्रावस्थिते चंद्रमसि मंदेनासोरेण दृष्टे अंधकार एव। अजगावा। अष्ट
राशिः। अत्र कर्कटमीनौ द्विवि ज्ञेयौ। मकरकुंभयोरुक्तावान्मंदत्रिंशा इत्यादिनेति। तेन कर्कटे राशौ यत्र तत्र राशौ
कर्कटनवांशकास्थ चंद्रमस्यंधकार एव। मीन नवांशकस्थे वातमस्यंधकार एव। तद्युक्ते वेति। तदितिसौ
रः परामृशति। यत्रतत्रावस्थिते चंद्रे सौरयुक्ते अंधकार एव। एवं निषेकानां शायनमपि। सार्वेष्वात
षुयोगेषु यदा अर्कदृष्टे चंद्रे मान वति नदा अंधकार एव। यस्माघवनेश्वरः। सौरांशकास्थ शशि
नि त्रलग्ने वक्षेन शाक्यां शाकमाश्रितेवाः तथा च सारावल्यां। बलवति सूर्ये दृष्टे बहुप्रदीपा धरार्धपुत्रेण
ज्ञान्यर्गतवि।यैः सूतो ज्योतिस्त्रा एवं भवति। सौरांशेजलजांशे चंद्रेऽर्कयुते वा हिबुके तदृष्टे वाकु

योत्तमसितिपसवंनसंदत्तः॥ नीचमेषस्थेभ्यस्तमाविति। शयनमित्यनुवर्त्तते। बहुवचनाद्यथासंभवं त्रिश्रुति
त्रिग्रहे नीचस्थे त्रीभोमाशयनं वाच्यं त्र्यमिग्रहणे न त्रयाणां तास्त्रमितिर्या। केचित्तु लग्नस्थे यदुर्थेवा नीच
गे चंद्रस्य शयनं। मिच्छंति। तथा च सारावल्यां। नीचास्थे नं शयनं चंद्रे पापयवासु खे विलग्ने वा। यदद्रिति।
पक्ष च लग्नराशि यद्वद्यं न प्रकारेण हरिजं बृजन्तु दयालश्चो परिसृजति। तद्वत्तोने व प्रकारेण नायगिनी
मान्तोवाच्यः। यत्रा कांशंन्न स्यात्साकं संसक्तं स्नमंतात्र दृश्यात। तद्धरिजंउक्तं च॥ हरिज मितिगगनमस्ते नो
संस्कृत मिवलक्ष्यते यथोक्तेषु। तथाच शीर्षोदायषुलग्नेषु उक्तानदैस्यो दरं दर्शयतो गर्न स्यमो च्योवाद॥
पृष्ठदयोश्वधः मुखस्य परष्टेदर्शयतः। मीनोदाय पार्श्वे दर्शयितः। तथा च सारावल्यां॥ शीर्षोदायविलग्नेस्
दुष्टि सवोन्यथोदायच राणेः। उत्तयोदाय च दस्तैः भुत्त दृष्टेनोत्तनोन्यथा कष्टः। केचिदवं व्याचक्षते। यथा
लग्नाधिपोनवांशकाधिपालग्नस्थोग्रहोवक्री भवति तदा विपरीत्येन गर्भमोक्षः। तथा च माणित्थः। लग्नाधि
पलेशाकपतौ लग्नस्थे वक्रितेग्रहे वापि। विपरीतोगतो मोक्षो वाच्यो गर्भस्य संकेतः॥ धापेरि तिपाप्य
ग्रहेश्वंद्रगतैः शशिनास्मद्व्यवस्थितेः। स्मरगतैर्लग्नौ सप्तमस्थे वा प्रसवकालेजननन्यामातुक्ते। मा ५६
मातुर्दुः। कष्टं कथयंतिमुनयः। तथा च सारावल्यां॥ क्रोशो मातुः कुरेवेधस्तगतेः शशोकयुक्ते वा॥ ८॥

अथ दीपगद्वारमिंदुवज्रयाह॥ स्नेहः शशांकादुदयाश्च वर्त्तिर्दीपोर्कयुक्तर्क्षवशाश्च राधः। द्वारं च तद्वास्तु
निकेंद्रसंस्थाज्ज्ञेयं ग्रहैर्वीर्यसमन्वितैर्वा॥ १८ स्नेह इति॥ शशांकाचंद्रात्स्नेहो वाच्यः। जन्मकाले प्रसवे चंद्रम
सिते तैलप्रसंदीपनाज्ञनं वक्तव्यं। ज्ञाणे हीणस्नेहो लेभ्येमिति। तथा च सारावल्यां। दीपः पूर्णे पूर्णः नाशिनि हीन
र्णिः हीनोल्पतैलश्च। यादवंत दामावास्यायां भर्वस्याकारे प्रसवो भवति तस्मादयुक्तमतत्। तेनयत्र राशौ
चंद्रमाव्यवस्थितस्तत्र यदि राशिप्रारंभे स्थितो भवति तदा दीपनाज्ञनं वैकव्यास्तदेन प्रवीव कव्यं। अत्र राशे
वसानेस्थितस्तदास्नेहाक्षे मध्यत्राश्चेद्ध मन्यत्रानुपाता दिति। उदयाश्चवत्तिः उदयलग्नादीपवर्त्तिनिर्देशा
लग्नारंभे तत्क्षणदग्धवर्त्तिशादश्याम ध्येर्द्धंदग्धमलग्नावसाने वर्त्तिदाहो वा। अंतरे अनुपात इति। तथा च सा
रावल्यां। यावल्लग्नादुदितं वर्त्ति स्ग्धमतुतावतीत्तवति। दीपो र्कयुक्तर्क्षवशादिति। अर्कोरविस्तद्युक्तराशिवशाद्धरा
शिर्घादीपोवक्तव्यः। तत्र चरराशिव्यवस्थिते र्केसंचार्यमाणोदीपश्चादेश्यः। स्थिरस्थे एकादशस्थे द्विस्वभावस्थे स्व
चलितभ्रतिष्ठितइति। केचिद्वदंती। यथा ०यस्मिन्राशाववर्कः स्थितः सराशिर्यस्यां स्थितः प्रागादीशा क्रिय
वृषनृयुगित्यादिनाश्चदर्शितस्तस्यां दिशि दीपश्चादेश्यः। अत्रान्येवदंति। यथोयस्यां दिशि अर्कस्तिमवसे
नतस्त्रहरकल्पनया सदिक्षु स्तमति। तानेवक्रमेण यस्यां दिशिव्यवस्थितः तस्यां दिशि गृहस्य दीपस्थान

मिति। तथा च सारावल्यां। द्वादशभागविभक्ते वास्तुगृहेष्ववस्थिते सदस्यांशो दीपश्चरस्थिरादिषु तथैव वाच्य
श्च सवकाले। अत्र प्राच्यादिगृहे द्वादशधा विभज्य मेषादिगणनया अर्के राशिर्यत्र भवति तत्र दीपस्था
नं भवति। केचिल्लग्नस्य यादृशो वर्णस्तादृग्वर्णं दीपवर्त्तिमिच्छंति। तथा च मणित्थः। लग्नस्यायात्र वाच्या
निर्दिष्टस्तेन वर्त्तिराशिं दृष्ट्वा। द्वारं तद्वास्तुनीति। तद्वास्तुनि सूतिकागृहे लग्नात्राकेंद्रस्थैर्ग्रहैर्द्वारादेशः
कार्यः। तस्य ग्रहस्य यादिक् प्राच्यादिरविशुक्रलोहितादित्तम इत्यादिनोक्ता स्पष्टि गतिमुखं सूतिकागृहं वक्तव्यं
बहुषु केंद्रस्थेषु बलवद्ग्रहवशात्। अन्येषु केषु द्वेषु द्वयमराशिवशात् लग्नस्य यादिक् तदभिमुखं यथा
यदनेन निवस्त्वस्यपदनाताक उक्तं॥ द्वारं वास्तुनि केंद्रोपगाद्ग्रहाद्वदंति वा विलग्नभाद्वा। इति। अन्ये वदंति। य
था लग्नद्वादशभागराशिदिगभिमुखं सूतिकागृहद्वारं। तथा च मणित्थः॥ लग्ने यो द्विरसांशस्तद्दिग
भिमुखं सूतिकागारद्वारं। एतच्च संवादेनापि दृष्टमिति। वीर्यसमन्वितादिस्तु त्वरत्र संबध्यते। केचिद्वदं म
ति। यथा वीर्यसमन्वितादुद्दात्गृहद्वारं वदंत। यथा च सारावल्यां। वास्तुगृहोद्यानगतं द्वारं दिक्पालकाद्व
लोपेतात्। इति॥ ५॥ अधुना सूतिकागृहे स्वरूपलानं शार्दूलविक्रीडितेनाह। जीर्णं संस्कृतमर्कलेहि ५

सुते दग्धेन वंशेन तं गोः काष्ठाढ्येन दृढं रवौ शशिसुते तान्नोकशिल्पयुक्तं वा। रम्यं चित्रयुतं नवं च सुगुरौ जीवे दृढं
मंदिरं चक्रास्थेस्तु यथोपदेशरचनां सामंतपूर्वां वदेत्॥१९॥ जीर्णं संस्कृतमिति। वीर्यसमन्वितादित्य
नुवर्त्तते। सवीर्याद्ग्रहाद्योऽर्कोऽनामोरवीर्यवतिसबले जीर्णमिति चिरंतनं। तत्र यसंस्कृतं सूतिकागृहं
वक्तव्यं। क्षितिसुतान्मोमे बलवत्यग्निना दग्धं। शीतगोर्विंदोर्नवं। शुक्लपक्षे उपालिप्तं वा वदेत्। यस्माद्धवनै
श्वरः। संवर्द्धितां वंद्रुमसोपलेपमिति। काष्ठान्दृढं रवाविति। रवावादित्ये काष्ठाद्यं दारुबहुलं नद
दृढं असारं। शशिसुते बुधे तद्गृहमनेकशिल्पयुक्तं बहुविधशिल्पविरचितं रम्यं चित्रयुतमिति। सुगुरौ
शुक्रे। रम्यं रमणीयं। मनोरम्यं चित्रयुतं चित्रकर्मसंयुक्तं। जीवे गुरौ दृढं चिरकालस्थापि। चक्रास्थे सं
क्रादिरूढे यद्गृहं तद्गृहसमीपास्थैरन्यैर्गेहैः सामंतपूर्वां समंतात्सर्वासु दिक्षु यथोपविष्टं वाद
त। सामंतपूर्वं प्रातिवेश्मिकावेश्मनो सामंता ताक्रामंतोऽन्यर्थः। यथा गृहं दानं गृहस्य पुरः पश्चाद्वाप
र्श्वयोर्वा अन्यग्रहाव्यवस्थिता। स्नाने वक्रमेण सूतिकागृहेस्थानि प्रतिवेश्मगृहाणि वा वानि। अ
न्ये सामंतपूर्वामिति पठंति। सामंता इह पर्यंतं पूर्वविचाररचनामिति। तथा च सारावल्यां। नयगृह
मंयोगेः प्रतिवेश्मसन्निवत्पना। याम्ये देवालयांशुपाकैवककोशाविदाराद्यवस्करस्थानं। स्निग्ध्य गृहे

वभास्कराशिकुजगुरुनार्यवाक्षिबुधायागात्। आचार्येणान्त्यमिकाप्रमाणं नोक्तं। त्रिशालद्विशालतान
तदुच्यते। वृहस्पातकर्कटास्थपरमोपरमोपात्। स्वक्षेलग्नाद्दशमे द्विन्यमिका। उत्तभागभ्नागस्थि
तत्रिन्यमिकं। उत्तभागस्थे चन्द्रे मिकं। धनुषिप्रबले दशमस्थानस्थे गुरौ त्रिशालं॥ तदुक्तं मायु
नकन्यामीनास्थ द्विशालं। उक्तं वसन्तजातके। गुरुरुच्चे दशमस्थे द्वित्रिचन्द्रमिकं करोति गदं। धनुष
मबले त्रिशालं द्विशालमन्येषु यमलेषु॥ ७॥ अथ समस्तवास्तुनि सूतिकागृहमिति तद्दिक्कालोद
धकेनाह॥ मेषकुलीरतुलालिघटैः प्रागुत्तरतो गुरुसौम्यगृहेषु। ७। अथ समस्तवास्तुनि सूति
पश्चिमतश्च वृषेण निवासो दक्षिणभागकरौ मृगसिंहौ। २०। मेषात् यः कुलीरः कर्कटः तुलातुय
एवः अलिवृश्चिकः घटः कुंभ एषामन्यतमे लग्ने वास्तुनि प्राग्भागे सूतिकास्थानं वक्तव्यं। अंगरेषा
उत्तरतो गुरुसौम्यगृहेषु। गुरुगृहे धन्विमीनौ। सौम्यगृहे मिथुनकन्ये। एतल्लग्नेषु तदंशके
वोत्तरतो वास्तुनः सूतिकागृहं वाच्यं। वृषलग्ने तदंशके वा गृहस्य पश्चिमभागे सूतिगृहं। मृगसिंहौ म
कराकसरिणौ दक्षिणभागकरौ विति। दक्षिणभागे सूतिकागृहं कुरुतः॥ ७॥ इदं सूतिकागृहं प्र ५८
शायनमिति तत्स्थानं विनावायनाह॥ प्राच्यादिगृहे कृयादयो द्वौ द्वौ कोणगता द्विमूर्त्तयः शय्या

स्त्वपि वास्तुवद्देल्याद्देः षष्ठनवांत्यसंस्थिताः॥ २१॥ गृहे सूतिकावेश्मनि प्राच्यादिपूर्वाद्याराशयः द्वौ द्वौ व
तस्रषु दिक्षु कोणगता द्विकूस्थाद्विमूर्त्तीया द्विस्वभावाः। तद्यथा मेषवृषयोर्लग्नगतायाः गृहस्य प्राच्यावे
गसूतिकाशयनं। मिथुने आग्नेय्यां। कर्कटसिंहयोर्दक्षिणे। कन्यायां नैरृते। तुलावृश्चिकयोः पश्चि
मधनुषि वायव्ये। मकरकुंभयोरुत्तरा। मीने ऐशान्यामिति। एष एव विधिः शय्यास्वपि वास्तुवद्द्देदिति। कि
त्वयं विशेषः। पादेः षष्ठनवांत्यसंस्थिता इति। इह षड्पादाः षष्ठनवांत्याः राशयः। लग्नात् षष्ठतृतीयनवम
द्वादशा राशयः पादाः परिकल्प्याः तान्येव ज्ञातं। यनलग्ने न प्रसवस्तद्दुक्तदिशि शय्या शिरः। तस्मादथ षष्ठ
त्रिनवांत्याः पादाः। तत्र द्वादशतृतीययोः पूर्वपादौ तत्रापि तृतीयदक्षिणःपादो द्वादशो वामः। षष्ठनवमौ प
श्चिमपादौ। तत्रापि षष्ठो दक्षिणो नवमो वामः। लग्नात्द्वितीयः शीर्षभागः। चतुर्थपंचमौ दक्षिणं गांग
प्रमाष्टमौ पादौ तन्नागः। दशमैकादशौ वामं अंगं। प्रयोजनं। विनतत्वं यमलोर्हैः क्रूरैस्त्रुट्यउपघात
इति। यत्र हि स्वभावराशयस्थितास्तत्र विनतत्वं यत्र पापास्तस्य दशो वोपघातः। एवं स्यादेवानुपघन्तंष
ह्मंगप्रसंगः। यस्मादवश्यं क्वचिदपि यमलद्वयेण पापग्रहेण च भवितव्यं। तस्माद्यत्र यमलत्वैसो
म्यग्रहस्वामियुतत दृष्टं तत्र विनतत्वं। पापग्रहोपिस्वोच्चराशि त्रिकोणहिंरंतस्थक्रादिदिग्या दन्येन्नैव

मित्रक्षेत्रस्थो शुभफलकरो भवतीति॥ ७॥ अधुनोपसृतिसंख्याज्ञानमनुष्टुभाह॥ चंद्रलग्नांतरगतैर्यैः
सुरूपसृतिकाः। बहिरंतश्चक्रार्द्धे तन्यादृश्येन्य थापरे॥ ८॥ लग्नाद्राशस्य यत्र राशौ चंद्रमा व्यवस्थितः।
तदंतरयोर्मध्ये यावंतो ग्रहाव्यवस्थिताः ते च चंद्रांतरगतास्तैरूपसृतिका सुः। तावत्संख्या उपसृतिका
समिपवर्तिन्यः स्त्रियः सुभावयुः। तास्त्र ग्रहतुल्यजातिवयोवर्णरूपाः। तथा च सारावल्यां। राशिलग्न
विवरर्युक्ता ग्रहा तुल्याः सृतिकासु विज्ञेयाः। अनुचितचक्रार्द्धयुते रंतर्बहिरन्यथा पदंश्याक। लक्षण
रूपवित्तवयो गाता सांशुभा नायोगात्। क्रूरेर्विरूपा दहा लक्षणहीनाश्चारोद्र मलिनाश्च। मिश्रैर्मध्यम
रूपा बलसहिताः स्वर्बीमतदवधार्यो बहिरंतश्चेति। तत्र यावंतदंशाश्चक्रार्द्धे व्यवस्थितास्तावत्संख्या
उपसृतिका गृह बाह्ये वक्तव्याः। यावंतश्चादृश्ये चक्रार्द्धे व्यवस्थितास्तावत्संख्या अभ्यंतार मध्ये वक्तव्याः
तत्र लग्नस्य यावंत उदिता भागास्तथा द्वादशो का दशनवमष्टमराशयस्तथा सप्तमराशौ लग्नादि
भागतुल्यो शादृश्य मध्ये अन्यथा पारा। अपारे अन्ये आचार्या अन्येन प्रकारेण दृश्ये विक्रार्द्धे अभ्यंतर
गता वर्णयंत्यदृश्ये बाह्यस्था ज्ञेया॥ एतदाचार्यस्य नाभिप्रेतं। यतोनोनेव स्वल्पजातके उक्तं राशि ५९
लग्नांतरसंस्थ गुणमित्यादिना द्वित्रिगुणात्वंतबाग्रहस्थान वशात् उपसृतिकानिश्चयः कार्य इत्य

र्थः। यतिबहुजनप्रसृतिःया गानभवंति। तथापि ग्रहसंख्याविसृतिकासंभवो यत्र भवति तत्र बहुजन
प्रसूति॥ या॥ गानभविति चामिति॥ ७॥ अथ जातस्य स्वरूपज्ञानं दोधकेनाह॥ लग्ननवांशपतुल्यतनुः स्या
द्वीर्ययुतग्रहतुल्यतनुर्वा। चंद्रसमेतनवांशपवर्णः कादिविलग्नविभक्तगात्रः॥ ९॥ लग्ननवांशपतिः ज
न्मकाले यो लग्ने नवांशकोऽभ्युदितस्तस्य यः स्वामी स लग्ननवांशपः। तत्तुल्यतनुस्तदाकारो जातो वक्तव्यः
यथा मधुपिंगल इत्यादि। अथवा जातककाले सर्वग्रहेभ्यो यो ग्रहो वीर्ययुतो बलवांस्तत्तुल्यतनुर्वक्तव्यः
यदि लग्ननवांशकस्थो राशि बलवान् भवति तदा लदंशतुल्या तनुर्भवत्यन्यथा। सर्वग्रहेभ्यो वीर्यवद्
ग्रहतुल्यतनुरिति। चंद्रसमेतनवांशकपतिः। तस्य यो वर्णस्तद्वर्णा जातो भवति। अत्र च वर्साहिरक्तश्यामो
भास्कर इति। अन्ये चंद्रराशिवर्णमवाहुः। यथा रक्तश्वेतः शुकतनुनिभ इत्यादिः। तत्र शुकवर्णस्यां संज्ञ
वा शुक्रमेतत्। एतद्ववर्णादिज्ञातकुलादेशान् बुध्यश्च यवक्तव्यं। उक्तं च। बलिनः सदृशी मूर्त्तिर्बुधैर्वा
ज्ञातिकुलादेशानिति। किंदिविलग्नविभक्तानगात्र इति। कादिनि विलग्नानैर्लग्नराशिभि विभक्तानि
गात्राणि यस्य स कादिविभक्तविलग्नाभागात्रः। तत्र लग्नाद्या राशिः कादिषु शिरःप्रभृतिषु यानि काल पु
रुषस्य लग्नकालांगानिति। तत्र लग्नं शिरः। द्वितीयो राशिर्वक्त्रं। तृतीय उरः। चतुर्थो हृत्। पंचमः क्रोडः। षष्ठ

कटिः। सप्तमो वस्तिः। अष्टमः शिश्नगुदे। नवमो वृषणौ। दशम ऊरू। एकादशो जानुनी। द्वादशो जंघापादौ। च
च्चराशीनां प्रमाणमुक्तं। पूर्वार्द्धविषय इति। तत्र यत्रांगास्तु दीर्घराशौ दीर्घराश्यधिपाग्रहो वा वस्थितो
भवति। तदंगं तस्य दीर्घं वक्तव्यं। स्वल्पप्रमाणराश्यधिपो दीर्घराशौ व्यवस्थितो। गं मध्यमं तत्र यत्रांगरा
शौ बहवो व्यवस्थिताः। तत्र बलवद्ग्रहवशाद्वाच्यं यत्र न कश्चिद्व्यवस्थितस्तत्र राशिप्रमाणं। तत एवांगवा
च्यं। सूतिकाप्रमाणे। अत्र वस्तुतिकाध्याय जातस्य व्रणमषकादिनिरूपणार्थमंगप्रकारणमार
भ्यते। तत्र लग्नप्रथमद्वितीयद्रेक्काणवशात् प्रथमद्वितीयतृतीयशरीरभागपरिच्छेदः। अत्र शिर
प्रथमोऽंगविभागः। शिरोधस्ताद्यावन्नाभिस्तावत् द्वितीयः। तदधस्तृतीयः। तेषामंगविभागो राशिविभा
गवशाद् द्रेक्काणेनाह॥ कं दृक्श्रोत्रनसाकपोलहनवो वक्त्रं च होरादयस्ते कंठांसकबाहुपार्श्वा
हृदयक्रोडानि नाभिस्ततः। वस्तिः शिश्नगुदे ततश्च वृषणावूरू ततो जानुनी जंघांघ्री त्विति यत्र वाममु
दितैर्द्रेक्काणभागैस्त्रिधा॥ १५ त्रित्रिभिः प्रकारैस्त्रिधा। त्रिभिर्द्रेक्काणभागैस्त्रिधा शरीरत्रिविभागः। प्र
थमद्रेक्काणे उदयति वस्तिपूर्वकः तृतीयः। तत्राप्यंगविभागो दक्षिणवामविषयवतां नं कथमित्याह
स्याह। वाममुदितैरिति राशिभिः उदितैर्दृश्यभागाः। ~~एष भागा उदितेषु।~~ शेषा अनुदिताः। अर्थादनुदितैरदृश्ये ६०

व्यवस्थितैर्वामांगविभागः लग्नस्योदितभागास्तथा द्वादशैकादशदशमनवमाष्टमाः सप्तमस्य राशेरपश्चा
नुदिता दृश्यभागाः संप्र एष भागा उदिताः। शेषा अनुदिताः। अर्थादनुदितैरदृश्ये दक्षिण इति। तत्र लग्नानु
दितभागास्तथा द्वितीयतृतीयचतुर्थपंचमषष्ठाः सप्तमराशेर्भागोदिता दृश्यभागाः एवं स्थिते लग्न
प्रथमद्रेक्काणोदये लग्नराशिकं शिरः कल्पनीयः। लग्नात् द्वितीयद्वादशौ दृक्चक्षुषी। तत्र द्वितीयो द
क्षिणमक्षि द्वादशो वामं। तृतीयैकादशौ श्रोत्रे। तत्र तृतीयो दक्षिणमेकादशो वामं। चतुर्थदशमौ
नासापुटौ। चतुर्थे दक्षिणं। दशमे वामं। पंचमनवमौ कपोलौ। पंचमो दक्षिणो नवमो वामः। षष्ठा
ष्टमौ हनुः षष्ठो दक्षिणमष्टमो वामं। सप्तमे वक्त्रं मुखं। एवं राश्याद्युपलक्षितः। प्रथमोऽंगविभागः। त
कंठांशक इति। अथ द्वितीयद्रेक्काणोदये कंठाद्वद्वितीयेऽंगविभागपरिकल्पनाः। तद्यथा। लग्नं कंठ
गलकः। द्वितीयद्वादशौ स्कंधौ। तत्र द्वितीयो दक्षिणो द्वादशो वामः। तृतीयैकादशौ ~~दक्षिण भागः~~ बा
बाहू तत्र तृतीयो दक्षिणो बाहुरेकादशो वामः। चतुर्थदशमौ पार्श्वे चतुर्थे दक्षिणं दशमो वामं।
पंचमनवमौ कक्षाभागौ पंचमो दक्षिणभागः। वस्तिः नवमो वामः। षष्ठाष्टमौ क्रोडं। उदरभागौ षष्ठो द
क्षिणोष्टमो वामः। सप्तमो नाभिरिति। नाभिग्रहणमुदाराप्लक्षणार्थं। एषा द्वितीयोऽंगविभागः। वस्तिः

शिश्नगुदेति। लग्नाद्द्रेष्काणे तृतीये तु इयति। एवं दारादयस्तृतीयेऽङ्गविभागपरिकल्पना तद्यथा। लग्नं
वस्तिर्नाभिर्लिंगयोर्मध्यविभागः। द्वितीयद्वादशौ शिश्नगुदौ। तत्र द्वितीयः शिश्नगुदयोर्दक्षिणो भागः
द्वादशो वामः। ततोऽनन्तरं तृतीयैकादशौ वृषणौ तृतीयो दक्षिणः। एकादशो वामः। चतुर्थदशमावूरू।
चतुर्थो दक्षिण ऊरुः दशमो वामः। पंचमनवमौ जानुनी पंचमो दक्षिणं जानु। नवमो वामं। षष्ठाष्ट-
मौ जंघे षष्ठो दक्षिणा जंघा अष्टमो वामा। सप्तमः पादद्वयमिति॥२५॥ अथाङ्गज्ञानप्रयोजनं शार्दूलविक्री-
डितेनाह॥ तस्मिन्पापयुते व्रणः शुभयुते दृष्टे च लक्ष्मादिशेत्स्वक्षांशे स्थिरभे युतेषु सहजः स्यादन्य-
थागंतुकः। मंदस्मानिलजोऽग्निशस्त्रविषजो भौमे बुधे भूभवः सूर्ये काष्ठचतुष्पादैर्हिमगौ शृंगाब्जजो-
ऽन्यैः शुभं॥ तस्मिन्पापयुत इति। तत्र प्रथमद्रेष्काणे जातस्य शिरोऽङ्गविभागः द्वितीये जातस्य कंठाद्यंग-
विभागः तृतीये द्रेष्काणे जातस्य बस्त्याद्यंगविभागः यत्र पापग्रहो व्यवस्थितस्तस्मिन्पापयुते व्रणो वाच्यः।
तस्मिन्नेव पापयुतेऽङ्गराशौ शुभयुते दृष्टे सौम्यग्रहेण संयुक्ते वावलोकिते वा लक्ष्माद्युपलक्षितेऽङ्गे ल-
क्ष्म आदिशेत्। मशकादिचिह्नं वाच्यं। स्वक्षांशे इति। स एव यदा व्रणमशकादिकर्ता स्वक्षांशे स्वराशौ
स्वनवांशके वा स्थितो भवति। स्थिरराशौ स्थिरांशके वा स्थितस्तदा व्रणमशकादि सहजोत्पन्नं तस्य जंतो- ६१

र्भवति। अन्यथाऽस्य विपर्ययः स्थित आगंतुको जातस्योत्तरकाले निमित्तेन वक्ष्यमाणेन तस्य दशाका-
ल एव वक्तव्यं। अथागंतुकस्य व्रणादेर्ग्रहवशेन निमित्तमाह। मंदस्मानिलज इत्यादि। मंदेनाने स्थावरव्र-
णकर्तृत्वं प्राप्तेन द्रव्येण घनमना। पाषाणहेतुको निलजो वातव्याधिहेतुको वा वक्तव्यः। भौमे व्रणकर्तृत्वं प्रा-
प्तेऽग्निशस्त्रविषजो अग्निहेतुकः। शस्त्रहेतुको विषहेतुको वा वक्तव्यः। हिमगोश्च दृ शृंगाब्जजः शृंगघाति-
घातहेतुकः। शृंगे विद्येते यस्य प्राणिनः स शृंगी तज्जातो जितात्मा वा जलप्राणिहेतुको वा वक्तव्यः। अ-
न्यैः शुभं। अन्ये ग्रहाः यस्मिन्नङ्गप्रदेशे स्थितास्तत्र भवंति। तत्र शुभं व्रणादिकरा न भवंति। अत्र च शेषो ग्रहो गुरु-
सितौ तत्किं बहुवचनं उच्यते बुधः पापयुतो व्रणकरः। तेषां चैवं इमानान्यथैतानि तेन्यैः शुभमिति युक्तं
॥२६॥ अथ व्रणज्ञानं हरिण्याह। समनुपतिता यस्मिन्भागे त्रयः सबुधा ग्रहा भवंति नियमात्तस्यावा-
प्तिः शुभेष्वशुभेष्वपि वा। व्रणकरः शुभः षष्ठो देहे तनोर्भसमाश्रितो तिलकमशकृद्दृष्टः सौम्यैर्युतश्च
स लक्ष्मवान्॥२७॥ समनुपतिता इति। यस्मिन्भागे वामे दक्षिणे वा त्रयः सबुधा ग्रहास्त्रयोऽन्ये ग्रहाश्च
बुधेन बुधेन सहिताः समनुपतिताः समाश्रितास्तत्र भागे तन्नाम्ना पूर्वोक्तांगस्य व्रणादिर्नियमान्निश्च-
यावदस्य प्राप्तिर्भवति। शुभेष्वशुभेषु वा। ते ग्रहाः सबुधाः शुभाः सौम्याः अशुभाः पापा वा भवति। तथा

पितत्रांशे तस्य पत्रेणाप्यत्रि वल्क्ष्यां। तेषां मध्याद्यो बली। स स्वदशायां करोति लग्नात् षष्ठे स्थाने असुतः पापः प्र
मेकेन वा बलाद्यास्यांसैकेवलाद्येन वाप्येवमेव। एवं त्रिभिश्चतुर्भिरप्युच्चस्थैर्मूलत्रिकोणस्थैर्वा हीनैर्वंशजा राजतुल्या
भवंति न राजानः। अत्र यदि ग्रहाः स्वोच्चगता मूलत्रिकोणगताः सदसंख्या संपादयंति। अथवोच्चगताः केवलं स्वत्रि
कोणगता वा तथापीति॥ अथान्यं राजयोगं विद्युन्मालयाह। रवीस्थे ऽर्के जे दोलमे नो मस्थावेकुं भेमंदे। वा
पं० चाक्षजीवे गुरौ वा पंचाक्षे राज्ञः पुत्रं विद्यात् पृथ्वीनाथं॥२४॥ लेखस्थायामिति। लेखास्थः। लेखाशब्देनोदयलेखो
च्यते। अर्के सूर्ये लेखास्थे तनुदर्शादर्थादिति न केवलं यावत् जे मेरवस्थे तत्रैव मेषलग्ने इंदौ स्थिते नो मेकुजे च्योबे मस्थे
मंदे सौरे कुंभस्थे जीवे गुरौ वा पक्षे वा पंचाक्षे धनुर्धरगते एवंविधे योगे जातं राज्ञः पुत्रं नृपसुतं पृथ्वीनाथं विद्या
त् ज्ञानी यात्। अन्यकुलजातो धनवान् अत्र केचिद्विखास्थे ऽर्के जे दोलमे इति पवंति। आदित्ये लेयस्थे सिंहगते
वं मेषस्थे लग्ने तदपि कनिष्ठविरोधः राजयोग एव भवति॥ अथान्यं राजयोगं विद्युन्मालयाह॥ स्वर्क्षे
के पातालस्थे धर्मस्थाने शशिवंशे दिङ्ग्भे वागगवाणि शोषजीतं स्वामीनमे॥२५॥ शुक्रे मित्रे स्वर्क्षे आत्मीयराशौ

स्थितेन केवलं पातालस्थे सन्नाह चतुर्थस्थानस्थो चंद्रे धर्मस्थानं गतेन नवमराशिगते शेषग्रहैः । रवि सोम बुध जीव भौ-
रैः दुश्चिक्यगा शनैः तृतीयलग्ने एकादशस्थानस्थे जातो नूनं स्वामी पृथिव्याः स्वाम्याधिपतिर्भवति । तत्रैतज्ज्ञातं । कुं-
भलग्ने वृषस्थे राहौ त्रिकोणे चंद्रे शेषा ये ग्रहा यथासंभवं मेषकुंभधन्विस्थाः । एवंविधयोगे जातो राजपुत्रो राजा ज्ञातो
राजा भवति । अन्यकुलजातो धनवान् । अथ कर्कटोदये तुले शुक्रः । मीने चंद्रे शेषाः कर्कटकन्यावृषस्थाः । एवं-
विधे योगे जातो राजपुत्रो राजा भवति । अन्यकुलजो धनवान् ॥ ७ ॥ अथान्यं राजयोगं यवनमतेनाह । सौम्ये वीर्य-
युते तनुमांस्थे वीर्याढ्ये च शुभे नवमगे सुखयाते धर्मार्थोपचयेषु शेषैः धर्मात्मा नृपजः पृथिवीशः । ८ । सौम्ये बुधे वी-
र्ययुते कालादिबलैर्युक्ते तथा तनुयुक्ते लग्नस्थे शुभे शुभग्रहे गुरुसितयोरन्यतमे यथासंभवं वीर्याढ्ये वीर्ययु-
ते शुभे याते धर्मस्थानगे नवमगे इत्यर्थः । कविरीर्याद्ये वा शुभे सुखयाते इति चतुर्थस्थानगत इत्यर्थः । अवशेषैः प-
रिशिष्टग्रहैः यथासंभवं धर्मार्थोपचयेषु स्थितैः धर्मस्थानं नवमं अर्थस्थानं द्वितीयस्थानं उपचयानि तृषडेकादश-
दशमानि एषामन्यतमस्थानस्थिते एवंविधयोगे जातो नृपपुत्रो राजपुत्रो राजा भवति । धर्मात्मा । अन्यकुल-
जो धनवान् ॥ ८ ॥ अन्यद्राजयोगद्वयं वंशस्थेनाह । वृषोदये मूर्त्तिधनारिलाभगैः शशांकजीवार्कसुतापरे
नृपः । सुखे गुरौ खे त्रिशिते तिग्मदीधितौ यमोदये लाभगते नृपोऽपरः ॥ ९ ॥ वृषोदये वृषलग्नगते तथा शशांक- २२३

जीवार्कसुतापरैः चंद्रगुरुसौरैः अपरैः रविकुजबुधसितैः यथासंख्यं मूर्त्तिधनारिलाभगैः लग्नद्वितीयषष्ठैकादशस्थैर्जातो
नृपो राजा भवति । तत्रैतज्ज्ञातं । वृषलग्ने चंद्रे मिथुनस्थे जीवे तुलास्थे सौरे । मीनस्थै रविकुजबुधसितै जातो राजपुत्रो राजा
भवति । अन्यकुलजो धनवान् । सुखे गुराविति । गुरौ जीवे सुखे चतुर्थस्थानस्थे त्रिशिते तिग्मदीधितौ चंद्रशशांकौ खे दशमस्थे
यमोदये शनैश्चरे लग्नगते । अपरे रत्नग्रहे भौमबुधशुक्रे लाभगते एकादशस्थे जातो नृपो राजा भवति । अन्यकुलजो
धनवान् ॥ ९ ॥ अथान्यद्राजयोगद्वयं वसंततिलकेनाह । मेषूरणायतनुगाः शशिमंदजीवा ज्ञारौ धने सितरवी हिबुके
नरेंद्र वक्रासितोष्णशशिसुरेज्यसितार्कसौम्या होरासुखास्त(?) रवात्रिगताः प्रजेशः ॥ १० ॥ शशिमंदजीवाः चंद्रसौर-
गुरवो यथासंख्यं मेषूरणायतनुगा दशमैकादशलग्नगाः । मेषूरणं दशमं आयमेकादशं । तनुस्थानं लग्नं । पृथु-
स्थाने पुगताः शशिमंदजीवाः । शशी चंद्रः मंदः सौरः जीवो बृहस्पतिः । ज्ञारौ बुधभौमौ धने द्वितीयस्थाने । सितरवी शुक्रार्कौ हि-
बुके चतुर्थस्थाने । एवंविधयोगे जातो नरेंद्रो नृपो भवति । तत्रैतज्ज्ञातं । दशमस्थे चंद्र एकादशे(?) सौरो लग्ने जीवो द्वितीये बुधभौ-
मौ चतुर्थे शुक्रार्कौ एवंविधयोगे जातो राजपुत्रो राजा भवत्यन्यकुलजो धनवान् । वक्रासितावितिः वक्रासितौ भौ-
मसौरौ । उष्णशशिसुरेज्यसितार्कसौम्याः चंद्रगुरुशुक्रबुधाः यथासंख्यं होरासुखास्तनवारवात्रिगाः । लग्नचतुर्थलग्न
सप्तमनवमैकादशगा भवति । तदा जातः प्रजेशो भवति । तत्रैतज्ज्ञातं । भौमसौरौ लग्नगतौ चतुर्थे चंद्रः । सप्तमजे

MEMORIAL

वोनवमेस्तुक्रोदशमेर्के॥ एकादशो बुधः। एवंविधेयोगेजातो राजपुत्रो राजा भवत्यन्यजो धनवान्॥ ॥ अथ राजयो
गेजातस्य कस्मिन् काले राज्यप्राप्तिर्भवतीतिज्ञानं स्वागतयाह। कर्मलग्नायुतपापदशायां राज्यलब्धिरथवा प्रबलस्य
। शत्रुनीचगृहपातदशायां विद्संश्रयदशा परिकल्प्या। राजयोगकर्तॄणां ग्रहाणां मध्ये तयोर्यदा कर्मयुतः लग्ना
दशमेयुतः। यश्च राजयोगकर्तॄणां ग्रहाणां मध्ये लग्नयुतो जन्मलग्नस्थः। तस्य पाकदशायां तस्य संबंधिनी या पाक
दशा तदृशा भवति तत्र तस्य राज्यश्रीलब्धिर्भवति। अत्र लग्नदशमयोरपि यदि द्वौ भवतः। तदा तयोर्यो बलवांस्तस्य द
शायां तद्दशाकाले राज्यलब्धिः। अथ बहवो भवंति। तदा प्रबलस्य। सर्वोत्तमबलस्य तद्दशाकाले राज्यलब्धिः। अ
थवा प्रबलस्येति। लग्नदशमौ यदा शून्यौ भवतः। तदा जन्मनि यः प्रबलः सर्वोत्तमः। बलस्य तद्दशाकाल एव राज्य
दः स्यात्। वक्रं च तद्दशा सु यस्मिन्न तद्दशाकाले वा रवशात्प्रति बलवान् भवति तस्यामेवांतर्दशायां राज्यप्रदो भ
वति। शत्रुनीचगृहेति। लब्धराज्यस्यापि जन्मकाले शत्रुक्षेत्रस्थेन वा नीचक्षेत्रस्थेन वांतरदशा दत्ता। तस्यां तस्मिं
श्छिद्रं। राज्यहरणं वाच्यं। सा छिद्रदशापि बलेपि तस्मिन् भवेद्भवति। मा च संश्रयसंज्ञा दशा परिकल्प्या। तस्यां तद्द
यां संश्रयः कार्योदैवयुक्तनृपसंश्रयं गुणतन्मोक्षोपि वृत्त्यातिवा। यात्रायां रिक्तोपहतदशायां चंद्रोदयनाथा। २२३
शत्रुपाकेनास्वदशेशाकारकदशा संश्रयणीयो नरेण पतिरिति। अत्र च भगवान् गार्गिः। लग्नगः कर्म २

गोवा स्यात्। दथवा प्रबलोपि यः। यस्यां स्वं तद्दशाकाले राज्यदं प्रबलो यदा। नीचारिगृहसंस्थस्य। दशायां प्रबलस्य
वाप्युति र्बलविहीनस्य तन्मोक्षो परसंश्रयादिति॥ ॥ अथ तो गिनां श्रीरदस्युपतिजन्मज्ञानं मालिन्याह। गुरुसित
बुधलग्नेमस्तमस्थेऽर्कपुत्रे वियति दिवसनाथे तो गिनां जन्म विंद्यात्। शुभबलयुतकेंद्रे क्रूरभास्थेश्च पापैर्व्रजंति श
रदस्युस्वामितामर्थलाभा। गुरुबुधसिताः जीव सोम्यशुक्राः एषां तमेऽर्कलग्नगते के पुत्रेसौरे सप्तमस्थे दिवसनाथेपि
यति। दशमस्थानगते। एवंविधेयोगे तो गिनां भोगवतां जन्म विद्यात् जानीयात्। एवंविधयोगे जाताः सदेव भोगव
न्। भवति। तस्यार्थविहीनस्यापि यतस्ततः कुतश्चिद्भोगवांश्चिर्त्तवि्वार विबुधसितलग्नइति। केचिद्विसितबुधा
नां संबंधिनि लग्नेइति व्याख्यातं। सिंहवृष। मिथुनकन्या वृषतुलालग्नेष्विति। यतो दशमस्थे ऽर्के नंदने दशमस्थे रवौ
जातो भोगवान् पूर्णो भाग्यपुरुषो भवति। शुभबलयुतेकेंद्रेषु शुभग्रहसंबंधिनो राशयस्तेषु बलाथस्यकेंद्रगता भवंति
। तैस्तथा भूतैः तथा पापैः क्रूरैर्ग्रहैः क्रूरभस्थैः क्रूरराश्याश्रितैर्यस्य जन्मनि भवति सत्र शबराणां पुलिंदानां दस्यूनां चौ
राणां स्वामित्वं व्रजति। अर्थलाकुधनवांश्च भवति। शुभबलयुतकेंद्रैरिति शुभग्रहैः बलयुतैः केंद्रगतैरिति के
चिद्व्याख्यातं। तद्वायुक्तं। यस्माद्भगवान् गार्गिः। पापस्तेऽर्कगतैः पापैः केंद्रस्थैः सौम्यराशिसितैः सबलैर्यस्य जन्म स्यात्
स्याद्दमौ दस्युनायकः॥ इति। इति भट्टोत्पलविरचितायां वृहज्जातकविवृतौ राजयोगाध्यायएकादशः॥ ॥

॥ ॥ अथातो नाभसयोगाध्यायमारभ्यते ॥ ८ ॥ नाभसानां चत्वारो विकल्पाः। आकृतियोगाः। संख्यायोगाः। आ-
श्रययोगा दलयोगो वेति। विकल्पचतुष्टयं। तत्राकृतियोगा एकोनविंशविकल्पाः। आकृतियोगाः। संख्यायोगा इ-
ति विकल्पद्वयं। आकृतियोगाः संख्यायोगाः। आश्रययोगाश्च विकल्पत्रयं। आकृतियोगाः संख्यायोगा आश्रययोगा
श्च विकल्पत्रयं। आकृतियोगाः संख्यायोगा आश्रययोगा दलयोगौ वेति विकल्पचतुष्टयं। तत्र विंशतिराकृतियोगाः।
सप्त संख्यायोगाः। त्रयश्च आश्रययोगाः। द्वौ दलयोगौ। तत्र द्वित्रिचतुर्विकल्पानां संख्याज्ञानायोपच्छंदसिकेनाह।
नवदिग्वसवस्त्रिकाग्निवेदैर्गुणिता द्वित्रिचतुर्विकल्पजाः स्युः। यवनैस्त्रिगुणा हि षट्शती सा। कथिता विस्तर-
तो हि तत्समासः ॥ १ ॥ नव प्रसिद्धाः। दिक्शब्देन दिश उच्यंते। वसवोऽष्टौ। एते यथा त्रिकाग्निवेदैर्गुणिताः। त्रिशब्दे-
न त्रय उच्यंते। अग्नयस्त्रयः। वेदाश्चत्वारः। एतैर्गुणिता नवदिग्वसवः। ते यथा। ९। १०। ८। एते यथासंख्यं द्वित्रि-
चतुर्विकल्पजा भवंति। एतदुक्तं भवति। आकृतियोगा विंशतिः। संख्यायोगाः सप्त। एवं आकृतिसंख्या-
विकल्पद्वयेन सप्तविंशतिर्योगा भवंति। आश्रययोगास्त्रयः। आकृतिसंख्याश्रयाः। तेन विकल्पत्रये-
ण विंशत्। योगौ द्वौ आकृतिसंख्याश्रयदलयोगास्तेन विकल्पचतुष्केण द्वात्रिंशत्। एवं द्वित्रि एवं द्वि- १२८
त्रिचतुर्विकल्पना योगाः स्युः। नाभस इति। यवना इति। पुराणयवनैस्त्रिगुणा हि षट्शती सा कथिता।

षण्णां शतीनां समाहारः षट्शती। सा त्रिगुणा अष्टादशशतान्युक्तानीत्यर्थः। ननु संक्षिप्तेन किमुक्तं। उच्य-
ते। नाभसयोगानामनंत्यं तथा वक्तव्यं। संस्थानमात्रमनंतकं स्यात्। द्रव्याणि नानाप्रततानि हि दृष्टेति। कथं पु-
राणयवनैरष्टादशशतान्युक्तानि उच्यते। आकृतियोगास्त्रयोविंशतिसंख्यासहिताः संख्यायोगानां स-
प्तविंशत्यधिकं शतं। एवं सार्धशतं भवति। १५०। तच्चैकं। कंलग्नराशिलग्नधिष्ण्यांकं। तस्माद्ध्रुवाद्द्वादशकेनाष्टा-
दशयोगशतानि। १८००। यस्मात् सार्धशतं द्वादशाहतमष्टादशशतानि भवंति। एतेषामुत्पत्तिमध्यायावसा-
ने प्रदर्शयिष्यामः। विदिताध्यायार्थस्य सुखावबोधत्वात्। एवं यवनैस्त्रिगुणा शतानि विस्तरतः कथितानि उ-
क्ताः। अत्रास्मिन् शास्त्रे तस्मात् समासतः संक्षेपः। ततो विस्तारस्य समो विधीयत इति। पूर्वं प्रदर्शितं। द्वात्रिंश-
देवाभिधीयते। शतफलेऽन्यफला नाम मासवान्। द्वात्रिंशत्स्वेव योगेष्वष्टादशशतान्तं ते संभवतीति ॥ ८ ॥ अ-
थाश्रययोगत्रयं दलयोगद्वयमौपच्छंदसिकेनाह। रज्जुर्मुसलं नलश्चराद्यैः सत्यस्त्वाश्रयजान् जगाद योगान्।
केंद्रैः सदसद्युतैर्दलाख्यौ स्रक्सर्पौ कथितौ पराशरेण ॥ २ ॥ चराद्यैश्चरस्थिरद्विस्वभावैर्ग्रहैः संयुक्तैर्यथासं-
ख्यं रज्जुर्मुसलं नलश्चेति योगत्रयं भवति। एवमेकस्मिन् द्विस्वभावराशौ द्वयोराश्योस्त्रये चतुर्थे वा यदा स-
र्वे ग्रहा भवंति। चरराशयः स्थिरराशयश्च सर्वे शून्या भवंति। तदा नलाख्यो योगो भवति। एतानाश्रयजान्स-

न्योगान्सत्यःसत्याचार्योऽङ्गीकृतवान्।केचित्सत्यस्त्वाश्रयजान्नेहाहयथागा।मालापंक्तिदृष्टास्मिन्
प्रकारेणआहोक्तवानिति।तथाचसत्यः।सर्वैश्चरेषुराशिषुयदास्थितास्तुशैलमाहुस्तंयोगं।जन्मनिकर्मणांयुक्तो
नामर्थमानान्यां।द्विशरीरेषुनलइतियोगोहीनातिरिक्तदेहानां।निपुणानांपुरुषाणांधनसंचयैर्भोगिनांभवति
।अत्रकेचिद्व्याख्यातं।चरराशिचतुष्केयदासर्वेग्रहाभवंति।तदारज्जुः।स्थिरराशिचतुष्केमुशलं।द्विस्वभावचतु
ष्केनलइति।तद्वायुक्तं।यतोभगवान्गार्गिः।एकोद्वौवात्रयःसर्वेचरा॰सर्वैर्युताग्रहैःवारयोगस्तदारज्जुःसर्वेषां
जन्मदोभवेत्।।स्थिराश्चेन्मुशलंनाममनित्यंजन्मभृणां।।द्विस्वभावेनलाख्यस्तुधर्मिनांपरिकीर्तितः।एवमा
श्रययोगत्रयंव्याख्यातंसत्यमतेनाह।तथाचसत्यः।चरराशिगैर्ग्रहैःरज्जुःस्थिरराशिगैस्तथामुशलं।द्वि
शरीरगतैर्योगान्नलसंज्ञस्तुनिर्दिष्टः।अथदलाख्योयोगद्वयमुच्यते।केंद्रैःसदसद्युक्तैरिति।केंद्रैर्य
थासंख्यंसदसद्युतैःसद्ग्रहैःशुभग्रहैःशुभयुतैःकेंद्रैर्दलानामयोगोभवति।तथाकेंद्रैरसद्ग्रहैःपापग्रह
युतैर्दलयोगःसर्पोनामभवति।येषुतेषुत्रिकेंद्रेषुसौम्यग्रहाबुधगुरुशुक्राभवंतिनकस्मिंश्चित्केंद्रेपा
पोभवति।तदास्रक्नामयोगोभवति।अथयेषुतेषुत्रिकेंद्रेषुपापारविसौरभौमाभवंति।नकस्मिंश्चि १२५
त्केंद्रेसौम्याग्रहोभवति।तदासर्पोनामयोगोभवति।नन्वत्रयोगद्वयंकेंद्रैःसदसद्युतैर्दलाख्यावित्युक्तं

।त्रिषुकिमितिव्याख्यातंयस्मादुक्तपक्षद्वयस्यपक्षयोश्चंद्रस्यसौम्यत्वंपापत्वंसंभवत्येवं।स्थितेयदासौम्याक्रांतेत्रिषुके
द्रेषुअक्षीणश्चंद्रमायदाभवेच्चतुर्थोभवति।अथवापापाक्रांतेषुत्रिषुकेंद्रेषुक्षीणश्चंद्रमायदाचतुर्थोभवति।त
दापिस्रक्सर्पौभवतः।ततश्चतुर्षुकेंद्रेषुकिमितिनव्याख्यातं।उच्यते।नचैतत्।यस्मादनेनैवस्वल्पजातके
उक्तं।केंद्रत्रययोगैःपापेतरैर्दलाख्यावहिश्चमालाच।अत्रसौम्यास्त्रयः।पापास्त्रयइतिकथंज्ञायते।यथा
तयोर्मध्येचंद्रमाद्वितीयोनभवति।उच्यते।नचगार्गिणोक्तं।त्रिकेंद्रगैर्यमारार्कैःसर्पोऽहिःखिन्नजन्मदा।
लोभिजन्मप्रदामालातद्वज्जीवसितेंदुजैः।अन्ययोगःपापवर्जितेषुकेंद्रेषुसर्पःसौम्यवर्जितेष्विति।कथं
ज्ञायतेबादरायणेनोक्तं।केंद्रेषुपापेषुसितज्ञजीवैःकेंद्रत्रिसंस्थैःकथयंति।मालां।सर्पस्तुसौम्येषुय
मारसूर्यैर्योगाविमौद्वौकथितौदलाख्यौ।एतौदलाख्यौयोगौस्रक्सर्पौपरस्परेणोक्तौ।उच्यते॥
अन्यैरुक्तौ।पराशरेणोक्तावित्ति।स्वशास्त्रेवराहमिहिरेणोक्तौ।तथाचमणित्थः।केंद्रत्रयगतैःपापैःसौम्यैर्वा
दलसंज्ञितौ।द्वौयोगौसर्पमालाविनेष्टेष्टफलप्रदौ।एतौएवमाश्रययोगमाह।अन्यैरुक्तमन्यैर्नोक्तमिति
।तथान्यैरुक्तंवादरायणमिहिरेणस्वशास्त्रगृहीतमेवंदलयोगद्वयंव्याख्यातं॥ ॥अथान्यैराचार्यैर्यनकार
णेनाश्रययोगत्रयंदलयोगद्वयं।चनाख्यातं।तत्कारणमुपजातिकयाह।योगाव्रजंत्याश्रयजाःसमत्वंयव

याज्ञवज्राण्डजगोलकाख्यैः॥ केन्द्रोपगप्रोक्तफलौ दलाख्यावित्याकरेणेन पृथक्फलौ तौ॥३॥ अथ यज्ञान्तरज्जुमुशलन
लयोगाः॥ अत्र तियोगैर्यज्ञवज्राण्डजगोलकाख्यैर्यूपसंज्ञविहगगोलकैरादिग्रहणाद्धंसो ऋषरा शाकटाख्यांच
गोलकाख्ये गोलियुगशूलकेदारैः संयोगैराश्रयजा योगास्तुल्यतां समं बुवन्तीत्यन्ये नौक्ताः॥ तथांतरे केनाप्याश्रय
योगा नानामेवावकाशो नास्तीति। वराहमिहिरेणोक्ताः॥ येश्रयोगैः समतां यास्यन्ति। यत्र वै तेषामवकाशः सदाप्रसा
यां ते व्याख्यास्यामः॥ केन्द्रोपगप्रोक्तफलौ दलाख्या विति दलाख्यौ योगौ केन्द्रोपगप्रोक्तफलौ केन्द्रस्थानं शुभग्रहाणां
शुभफलमुक्तमशुभानामशुभमित्यत एव तौ प्रोक्तफलौ कथितफलौ। उक्तं च। वराहमिहिरेण केन्द्रत्रिकोणेषु
शुभाः प्रशस्ताः स्थेप्यपापा नमेशुभप्रदाः स्युः॥ केन्द्रत्रिकोणगैः शुभफलैः शुभफलं भवति। मौलानोक्ताः एवं केन्द्रत्र
यगैः पापैः पापफलं भवतीति मर्पनोक्तः। एवमन्ये परे आहुः अकथयंति। यथा न पृथक्फलायुक्तार्थवा
ता। यद्यप्येवं तत्कथं वराहमिहिरेणोक्ता वित्युच्यते। नाभसयोगौ तत्त्वौ तौ तु समस्तदशास्वपि फलदौ भव
तः। यदा केन्द्रोपगानां विनाफलमंगीक्रियते। तदा स्वदशास्वेव फलं प्रयच्छंति। एतत्र पराशरादीनां मतं। ते
षां मतं यथा नाभसयोगावेतौ समस्तदशास्वपि फलदौ तेन वराहमिहिरेणोक्तौ॥ ४॥ अथ तृतीयोगानुपं १२६
वगदाशाकटविहंगशृंगाटकहलाख्यान् वसंततिलकेनाह। आसन्नकेन्द्रभवनद्वयगैर्गदाख्यस्त्वन्यस्त

गे शशाकटविहगाः खतुंबरसशृंगाटकं नवमपंचमलग्नसंस्थैः लग्नान्यगैर्हलमिति प्रवदंति तज्ज्ञाः॥ ५॥ आसन्नेति केंटव
त्रिनिकेन्द्रभवनद्वयेकंटकराशियुग्मे यदा सर्वे ग्रहा भवंति तदा गदाख्यो योगो भवति। स च तुः प्रकारः। लग्नचतुर्थे स्ति
र्वग्रहैरेकः। चतुर्थसप्तमस्थैर्द्वितीयः। सप्तमदशमस्थैस्तृतीयः। दशमलग्नस्थैश्चतुर्थः। तत्र लग्नगे विति। लग्नसप्तमगे ग्र
हे शुभसर्वैश्शुभशकटो भवति। खवं चैर्दशमचतुर्थयोः स्थितेशु सर्वग्रहेशु विहगाख्यो योगः। नवपंचमलग्नसंस्थैः स
र्वग्रहैः शृंगाटको योगः। लग्नान्यगैरिति। लग्नवर्ज्यं यथा सर्वग्रहाः परस्परं त्रिकोणगा भवंति। तदा हलमिति योग
तज्ज्ञा होराशास्त्रपंडिताः कथयंति। स च त्रिप्रकारः। द्वितीयषष्ठदशमस्थैः सर्वग्रहैः प्रथमः। तृतीयसप्तमैका
दशस्थैर्द्वितीयः। चतुर्थ्रमदशगैस्तृतीयः॥ ५॥ अथ वज्रयवकमलवापीसंज्ञं योगचतुष्टयं येतालीकेनाह। शा
व कटांडजौ वत्स्यशुभैर्वज्रं तद्विपरीतयगैर्यवकमलं तु विमिश्रसंस्थितैर्वापी तद्यदि केन्द्रबाह्यतः॥ ६॥ शाकटे
वस्थितेः शुभग्रहैरंडयवदशुभैश्च वज्रं भवति। तद्विपरीतागैर्यवः। एतदुवग्रहा यदि विपरीतं गता भवंति त
दा यवाख्यो योगो भवंति। शाकटपक्षुनाश्रंडजव त्रुनाः। अंडजो विहगः। एतदुक्तं भवति। लग्नसप्तमयोः स्थिता
श्चतुर्थदशमयोश्शुभाः स्तदा यवाख्यो योगो भवति। कमलं विति। एते रेव सौम्यपापैर्विमिश्रसंस्थितैश्चतुर्थ
पिकेंद्रस्थसमस्थितैः सर्व एव स्थग्रहैः पापाः सौम्या विमिश्रिता यदा भवंति। तदा कमलाख्यो योगो भवति। तदे

वकमलयादिकेन्द्रबाह्यतो भवति। तदा वापी एतदुक्तं भवति। सर्वैः केन्द्रबाह्ये स्थितैः पणफरापोक्लिमोप
गैस्तदेव कमलवापीसंज्ञो भवति। पणफरेषु चतुर्षापोक्लिमेषु चतुर्ष्विति॥६॥ अथ वज्रयवयोः संभवो न भव
तौ च मया शर्वशास्त्रानुसारेण कृतावित्येतदनुष्टुभाह। शर्वशास्त्रानुसारेण मया वज्रादयः कृताः। चतुर्थे भवने
सूर्यात् ज्ञसितौ भवतः कथं॥२॥ शर्वशास्त्रानुसारेण शर्वाचार्यैर्मयय वनाद्यैर्वज्राख्यो योगः। ततो यथाख्य
वज्रादय इति बहुवचननिर्देशो अन्येषामेवं प्रकाराणां। प्रदर्शनार्थं वज्रादयो योगा यद्यपि न संभवंति तथा
पि शर्वशास्त्रानुसारेण मया कृताः। तान्यनुश्रित्य मया कृता इत्यर्थः। सूर्यादादित्याच्चतुर्थे राशौ शर्वेण पश्चि
म भवा ज्ञसितौ बुधशुक्रौ कथं न भवतः। न कदाचिदर्कोदये अस्तमये वा मध्याह्नार्धरात्रयोर्बुधशुक्रौ भवतः
आदित्ये मध्यस्थे वा तयोरस्तगतयोर्वा न भवत्येव॥६॥ अथ यूपेषुशक्तिदंडाख्ययोगचतुष्टयं अनुष्टु
भाह। कंटकादिप्रवृत्तैस्तु चतुर्गृहगतैर्ग्रहैः। यूपेषुशक्तिदंडाख्या होराद्यैः कंटकैः क्रमात्॥७॥ होराद्यैः कंटकैः
क्रमात् परिपाट्या लग्नकेन्द्रमादितः स्थितैश्चतुर्षु। ग्रहेषु यथासंभवं सर्वग्रहाणां भवस्थानं भवति तदा
यूपेषुशक्तिदंडाश्चत्वारो योगा भवंति। तद्यथा लग्नद्वितीयतृतीयचतुर्थेषु यदा सर्वग्रहा भवंति तदा यूपा १२७
ख्यो योगो भवति। अथ चतुर्थपंचमषष्ठसप्तमेषु चतुर्षु यदा सर्व एव ग्रहा भवंति तदेषुः शराख्यः। अथ

सप्तमाष्टनवदशमेषु चतुर्षु यदा सर्वे ग्रहा भवंति तदा शक्तिः। अथ दशमैकादशद्वादशलग्नेषु चतुर्षु यदा सर्वे ग्र
हा भवंति तदा दंड इति॥८॥ अथातो नौकूटछत्रचापार्धचंद्राख्ययोगपंचकमनुष्टुभाह। नौकूटछत्रचापानि तद्व
त्सप्तर्क्षसंस्थितैः। अर्धचंद्रस्तु नावाद्यैः प्रोक्तस्त्वन्यर्क्षसंस्थितैः॥९॥ तदत्र नैव प्रागुक्तेन प्रकारेण लग्नकेन्द्राद्धारस्य ए
कैकस्मात्। केन्द्रात् सप्तभिर्ग्रहैः सप्तर्क्षसंस्थितैः। नौकूटछत्रचापाख्ययोगचतुष्टयं भवति। तद्यथा। लग्नद्वितीयतृ
तीयचतुर्थपंचमषष्ठसप्तमेषु यदा सर्वे ग्रहाः भवंति। तदा नौ आख्यो योगो भवति। नावाद्याः कंटके शक्ताः। तेभ्योऽ
न्यर्क्षसंस्थितैः नौकूटछत्रचापाख्ययोगचतुष्टयं भवति। येन पणफरेष्वारभ्य निरंतरसप्तसु गृहेषु यदा
सर्वे ग्रहा भवंति। तदेकप्रकाराश्चापोक्लिमेभ्यो वा तदा अर्धचंद्राख्यः। स चाष्टप्रकारः। तद्यथा। द्वितीयतृती
यचतुर्थपंचमषष्ठसप्तमाष्टमेषु सप्तसु यदा सर्वे ग्रहाः भवंति। तदेकप्रकारः। एवं तृतीयादिष्वनवमां
तेषु द्वितीयः पंचमादिषेकादशांतेषु तृतीयः षष्ठादिषु द्वादशांतेषु यदा सर्वे ग्रहा भवंति त
दाष्टम इति॥१०॥ अथ समुद्रचक्राख्यौ यौ द्वौ योगावनुष्टुभाह। एकांतरगतैरर्थात् समुद्रः षड्भाश्रितैः
विलग्नादिस्थितैश्चक्रमित्याकृतिजसंग्रहः॥[illegible]॥ अर्थात् द्वितीयस्थानादारभ्य एकांतरगतैर्ग्रहैः षड्गृहाश्रि
तैः षड्राशिषु व्यवस्थितैः। सप्तभिर्ग्रहैः समुद्राख्यो योगो भवति। तद्यथा। द्वितीयचतुर्थषष्ठाष्टमदशम

चादयोषट्सु यदा सप्तग्रहा भवंति तदा समुद्रयोगः। अनेन प्रकारेण विलग्नात् पातालमात् अन्यत्र प्रवृत्तैः कोनस्थै
ः षट्सु यदि सप्तग्रहा निरंतरं स्थिताः। चक्राख्यो योगो भवति। इत्येवं प्रकारः। तद्यथा। लग्नतृतीयपंचमसप्तमैकाद
शेषु यदा सर्वे ग्रहा भवंति तदा चक्राख्यो योगो भवति। इत्येवं प्रकारश्चाकृतिजसंग्रहदशाद्युत्पन्नानां सयुहो
व्याख्यातः॥८॥ अथ संख्यायोगसप्तकं शालिन्याह॥ संख्यायोगाः सप्तसप्तर्क्षसंस्थैरेकापायाद्वल्लकी दामि-
नी पाशः केदारशूलयोगो युगं च गोलान्यान् पूर्वमुक्तान्विहाय॥१०॥ सप्तनिर्ग्रहैः सप्तर्क्षसंस्थैः सप्तसु राशि-
षु गतैरेकापायादेकापयोगात् सप्तसंख्यायोगाः स्युः भवेयुः। ते च वल्लक्यादयो योगा लोकं ताः। तद्यथा। येषु ते-
षु सप्तगृहेषु यदा सर्वे ग्रहा भवंति। तदा वल्लकी नाम योगो भवति। अथ षट्सु येषु तेषु सप्तग्रहा भवंति त-
दा दामिनी नाम योगः। एवं पंचसु पाशः। चतुर्षु केदारः। त्रिषु शूलः। द्वयोर्युगः। एकस्मिन् गोलः। अन्यान् पूर्व-
मुक्तान् विहाय। पूर्वोक्तान्यावर्जयित्वा एते योगा भवंति। एतदुक्तं भवति। यथोक्तानां योगानां मध्ये यदि सं-
ख्यायोगस्य सादृश्यं भवति तदा संख्यायोगानां गीकार्यः स एव योगो ग्राह्यः॥८॥ अथाश्रययोगत्रय- १२८
जातानां दलयोगजातानां च फलं वसंततिलकेनाह। ईर्ष्युर्विदेशनिरतोध्वरुचिश्च रज्ज्वां मानी ध-
नी च मुशले बहुकृत्यसक्तः। व्यंगः स्थिराढ्यनिपुणो नलजः स्रगुत्थो भोगान्वितो भुजगजो बहुदुःख-

भाक् स्यात्॥११॥ ईर्ष्युर्विदेशनिरत इति। ईर्ष्युः परमर्द्धिमत्सरः। विदेशसक्तः परदेशासनसक्तः। अध्वरुचिः सत-
मटनः। ननु विदेशरुः रत एवाध्वरुचिस्तत्किमर्थं दर्शनं द्वयोर्ग्रहणमुच्यते। वदेष्येकप्रदेशाव्यासनशीलो न भ-
वति। एवं रज्ज्वाख्ये योगे जातो भवति। मानी तिगर्वितः। धनी वित्तवान् बहुकृत्ये कार्येषु शक्तो बहुकर्मारंभशील
ः। एवंविधमुशलाख्ये योगे जातो भवति। व्यंगोऽंगहीनः। विगतमंगं यस्य। स्थिरो दृढनिश्चयः। आढ्यो धनवान्
निपुणः कार्यप्रकृष्टमदक्षिः। एवंविधो नलजो नलाख्ये योगे जातो भवति। एवमाश्रययोगत्रयजातानां फलं व्या
ख्यातं। स्रगुत्थो भोगान्वित इति। स्रगुत्थः स्रक्मालायोगजो भोगान्वितो भोगासक्तो भवति। भुजगजो भुजं-
गाख्ये सर्पयोगे जातो भवति बहुदुःखभागिति नानाप्रकाराणां दुःखानां भागी भवति। केचिद् बहुवचनं
पठंति व्यंगाः स्थिराढ्यनिपुणा नलजाः स्रगुत्थाः भोगान्विता भुजगजा बहुदुःखभाज इति। इत्यपि कश्चिन्न
दोषः। एवं दलयोगद्वये जातानां फलं व्याख्यातं॥८॥ अथान्यो योगश्चाश्रययोगस्य प्रमदा समकालं यत्र दृष्ट-
ते तत्राश्रययोगस्य निराकरणार्थमनुष्टुभाह। आश्रययोगास्तु विफला भवंत्यन्यैर्विमिश्रिताः। मिश्रयोस्तत्फलं
दद्युरमिश्राः स्वफलप्रदाः॥१२॥ यत्रान्यो योगश्चाश्रययोगश्च भवति। तत्राश्रययोगा अन्येन यवादिना मिश्रा भवंति।
मिश्रत्वाद्याल्पफलो भवति। स्वफलं न प्रयच्छंति परैरन्यैर्विमिश्रिता निःफला येऽमिश्राः साहस्रं गमास्तेन

नफलं दद्युः॥ केचिन्मिश्राये स्वफलं तेषामिति पठंति। अमिश्राश्चान्ये यदा भवंति तदा स्वफलप्रदा भवंति। स्वफ
लप्रदा आत्मीयं फलं ददति। तत्र चरराशौ जन्मगते स्थिरद्विभावस्थैर्ग्रहैः अमिश्राः स्थिरलग्ने चरद्विस्वभावस्थैर
मिश्राः द्विस्वभावलग्ने चरस्थिरगतैरमिश्रा इति॥६॥ अथ गदाशकटविहगशृंगाटकहलाख्येषु योगेषु जा
तानां फलस्वरूपं वसंततिलकेनाह॥ यज्वार्थनाकुसतमर्थरुचिर्गदायां तद्वित्तुकच्छकटजः स्मरुजः कुदार
ःस्तोटनः कलहे तत्रविहगे प्रदिष्टः। शृंगाटके चिरसुखी त्वषिसत्वहलाख्ये॥४॥ यज्वा यजनशीलः। अर्थनाकु
धनानां तावजनं। सततं सर्वकालमर्थरुचिः। अर्थार्जनोद्यमशीलः। एवंविधो गदाख्ययोगे जातो भवति। त
द्वित्तुगिति। न द्वितिशाकटपरामर्शः। तद्वित्तुकच्छाकटद्वित्तुके शाकटाजीवी पेमवतीत्यर्थः। मरुजं व्या
ध्यादितः। कुभिन्नमार्थपवंधः। शाकटजः शाकटयोगे जातो भवति। स्तेतिस्तः। परसंदेशप्रापणार्थं पर
मकारागामा। अटनः परिभ्रमणशीलः। ननु हूतेनाप्यवश्यमटनेन भवितव्यं। उच्यते। परेच्छयागमनाग
मनशीलो दूतः। अयं पुनः स्वेच्छया अटनः। तदुत्तयानपिभवति। कलहरतः कलहशीलः। विहगाख्ययोगे १२९
जातो भवति। अन्यत् स्थिरं सुखी शृंगाटके व्याख्यातं। तदप्युक्तं। यस्मात् भगवान् गार्गिः। लग्ने पवमधमस्थे योगाः
शृंगाटको मतः। वयोऽन्ते सुखिनां जन्म तस्यात् स्वाड्ने घिणां। त्वषितत्कलहाख्ये योगे जातो भवति

कृषिकृद्भवति। कृषिं करोतीत्यर्थः॥६॥ अथ वज्रयवकमलवापीनां स्वरूपं वसंततिलकेनाह॥ वज्रेंत्यपूर्वसुखितः सुभगोति
शूरः। सौर्यान्वितोप्यथ यवे सुखितो वयोऽन्तः॥ विख्यातकीर्तिमितसौख्यगुणश्च पद्मे वाप्यां तनुस्थिरसुखी निधिकृन्नदा
ता॥९॥ वज्रेंत्यपूर्वसुखित इति। अंते वयान्ते सुखितो भवति। पूर्वे सुखितश्च बाल्ये सुखी यौवने दुःखितो हवेदुन
रेव सुखी भवतीत्यर्थः। सुभगः सर्वजनवल्लभः। अतीव शूरोऽतीव संग्रामधीरः। एवंविधो वज्राख्ययोगे जातो भवति
।सौर्यान्वितः। पराक्रमयुक्तः॥ अथ शब्दयात्पुरस्तात् वयोऽन्तर्वयो मध्ये अंसुखी। अंतः शब्दो मध्यपर्यायः। एवं
विधो यवाख्ययोगे जातो भवति। विख्यातकीर्तिः सर्वजनप्रसिद्धकीर्तिमान्। ननु किमपि विख्यातकीर्तिरस्ति उ
च्यते। अस्मिन् विख्याता यथा कीर्तिः पापकर्मणिः शानैरपि परं प्रख्यातकीर्तिं न प्राप्नोति। अपरमितसौख्यश्च प
रमितगुणश्च स्वगुणा विद्याशौर्यादयः। एवं पद्माख्ययोगे जातो भवति। तनुस्थिरसुखः। तनुस्वल्पं स्थिरं चिरकाल
स्थायि सुखं यस्य स्वल्पं सुखं बहुकालं भवति। निधिकृत् भूमावर्थस्थापनशीलः। न दाता कदर्यः। एवंविधो वापीसं
ज्ञे योगे जातो भवति॥१०॥ अथ यूपशरशक्तिदंडाख्ये योगचतुष्टये जातानां स्वरूपं वसंततिलकेनाह। त्यागा
त्मवान् क्रतुवरैर्यजते च यूपे हिंस्रोऽथ गुप्त्यधिपतिः शरजः शठराख्यो। नीचोऽलसः सुखधनैर्वियुतश्च शक्तौ दंडे
प्रियैर्विरहितः पुरुषोत्यहत्रिः॥११॥ त्यागात्मवानिति। त्यागी दाता आत्मवान् प्रमादी क्रतुवरैर्यजते। श्रेष्ठैर्य

ज्ञेयं जन्तेः एवंविधे इषुपाख्ये योगे जातो भवति। हिंस्र इति। हिंस्रो धरुचिः। गुह्याधिको बंधनका[illegible]
कर्ता। एवंविधः शराख्ये योगे जातो भवति। नीचोऽलस इति। नीचश्चाधमानामनुचितानां कर्मकर्त्ता। अलसः क्रि-
यामंदः। सुखधनैर्वियुतः। निःसुखो निर्धनश्च। एवंविधः शक्त्यौ योगे जातो भवति। दंड इति। प्रियैः पुत्रादिभि-
र्विरहितः। वर्जितः। अन्यवृत्तिः। दासवृत्तिः शूद्रवृत्तिरित्यर्थः। दंडाख्ये योगे जातो भवति॥ ॥ अथ नौकूटछत्र-
कार्मुकजातानां स्वरूपं वसंततिलकेनाह। कीर्त्यायुतश्चलसुखः कृपणश्च नौजः कूटे नृतक्षवनबंधनपश्च
जातः। छत्रोद्भवः स्वजनसौख्यकरोऽन्त्यसौख्यः शूरश्च कार्मुकभवः प्रथमान्त्यसौख्यः। २६। कीर्त्यायुतः ख्यातय-
शाः। चलसुखः कदाचित्सुखी कदाचिद्दुःखी। कृपणः अदाता। चशब्दः समुच्चये एवंविधे नावाख्ये योगे जातो भव-
ति। कूटे नृत इति। अनृते अप्लव नाम तिर्यग्यामी अनृतप्लवनः। असत्यानि भाषी। अनृतभाषी। बंध- पो बंधनपा-
लः। केचित् कूटानृत इति। कृपणबंधनपश्च जात इति पठंति। कृपणश्च अदाता। एवंविधः कूटाख्ये योगे जातो
भवति। छत्रोद्भव इति। स्वजनानां बंधूनां सुखं करोति सुखेन धारयति। स्वजनसौख्यकरः। वृद्धत्वे सुखितः। एवंवि-
धः छत्राख्ये योगे जातो भवति। शूरः संग्रामप्रियः। प्रथमांत्यसौख्यः। प्रथमे बाल्ये सुखी अंते वार्द्धे सुखी। एवंवि- १३०
धः कार्मुकभवश्चापाख्ये योगे जातो भवति॥ ॥ अथार्द्धचंद्रसमुद्रचक्रवज्रकीजातानां स्वरूपं वसंततिलके-

नाह। अर्द्धेंदुजः सुभगकांतवपुः प्रधानः तोयालये नरपतिप्रतिमः सुभोगी। वक्रे नरेंद्रमुकुटद्युतिरंजिताङ्घ्रिर्वीणोद्भ-
वः सुनिपुणः प्रियगीतनृत्यः। २७। सुभगः सर्वजनप्रियः। कांतवपुः दर्शनीयः। प्रधानः सर्वजनपूज्यः। एवंविधे अर्द्धेंदुजो
अर्द्धचंद्राख्ये योगे जातो भवति। नरपतिप्रतिमो राजतुल्यः। भोगी भोगवान्। एवंविधः तोयालये समुद्राख्ये योगे जा-
तो भवति। वक्र इति नरेंद्रा राजानः। तेषां मुकुटाः किरीटाः। किरीटरत्नानि तेषां द्युतिः। कांतिः तया रंजितौ विबुरितौ। अं-
घ्री पादौ यस्य राजानः तस्य पादपो भवंति। महाराजाधिराजो भवतीत्यर्थः। तपोज्ञानादियोगाज्ज्ञातः इज्यनीयो
वा। एवंविधे चक्राख्ये योगे जातो भवति। आद्यंतियो विंशतिकस्य फलं जातानां व्याख्यातं। अत्रैव नृपालसंयो-
गस्य फलं व्याख्यायते। वीणोद्भवो वीणेति निपुणः सूक्ष्मदृष्टिः गीतप्रियः। वज्रकाख्ये योगे जातो भवति॥ ॥ अथ दा-
मिनीपाशकेदारशूलजातानां स्वरूपं वसंततिलकेनाह। दातान्यकार्यनिरतः पशुपश्च दाम्नि पाशे धनार्जनवि-
शीलसभृत्यबंधुः। केदारजः कृषिकरः सुबहूपयोज्यः शूरः क्षतो धनरुचिर्विधनश्च शूले। २८। दाता उदारः।
अन्यकार्यनिरतः परोपकारसक्तः। पशुपः पशूनां रक्षिता। बहुपशुर्भवति। अथवा पशुपावे पशूनां
पालयिता रक्षिता ग्रामाधिपतिरित्यर्थः। एवंविधे दाम्नियोगे जातो भवति। पाश धनार्जन इति। धनार्जने
विशीलो धनार्जनविशीलः। असन्मार्गे यो धनार्जनं करोति। तथाभूता अस्य भृत्याः कार्मकरा वा बांधवाश्च

भवंति। एवंविधेः पाशाख्ययोगेजातोभवति। केदारजइति। कृषिकरः कृषिंकरोति। सुबहूपयोज्यः सुहृद्शोभ
नंभवाबहूनामुपयुज्यते उपकरोति। एवंविधः केदारजः केदाराख्येयोगेजातोभवति। शूरः समरधीरः। धना
र्जनेपरिगर्वबुद्धिः। हतः प्रहारितः। धनरुचिरर्थप्रियः। विधनोदारिद्रः। एवंधः शूलाख्येयोगेजातोभवति
॥७॥ अथयुगगोलकयोर्जातस्यस्वरूपं सर्वेषांनाभसयोगानांसमस्तदशास्वपिफलप्रदत्वज्ञानंहरिणा
हा। धनविरहितः पाषंडीवायुवेगवथगोलकेननिधन निधनमलिनोपेतः कुशल्पालसोटनः। इतिनि
गदितयोगाःसार्द्धफलैरिहनाः। समानियतफलदाश्चिंत्याद्येतेसमस्तदशास्वपि॥१०॥ धनविरहीतोर्थहीनः
पाषंडी। पाषंडीत्रयीत्रमार्गव्यपेतः। एवंविधोयुगाख्येयोगेजातोभवति। अथगोलकेविधनमलिनइति
अथशब्दोऽनंतर्ये। विधिनोर्थहीनः। मलिनः। मलोपेतः। शरीरमलिनः। वाससोवाअज्ञानोपेतोमूर्खः। कुशि
ल्पालोकनिंद्यशिल्पिकर्ता। अलसः। क्रियास्वपटुः। अटनोभ्रमणशीलः। नित्यवाटनोलसश्चेतिविरु
द्धः उच्यते। यद्यपिस्वरूपेणालसस्तथापिअतिलोजनक्रियामंडनंविनासंपादयितुमशक्तत्वात्अटनः २३१
एवंविधोगोलकाख्येयोगेजातोभवति। एवंसप्तसंख्यायोगफलंव्यातं। इतिनिगादियोगाइति। इत्ये
वंप्रकारोनाभसयोगाइति। फलैःसार्द्धमहनिगदिताउक्ताः। इहास्मिन्नध्याये एतेसमस्तदशास्वपिनि

यतफलदाः। सर्वकालंफलप्रदायिन्यः। विज्ञातव्याः। ननुवज्रादिव्याद्यंतसुखिनामस्त्र कथंसमस्तदशास्वपीत्युक्तं। उ
च्यते। तेषांवचनादेवयथादर्शितकालःसुखदुःखयोर्भविष्यति। येषांकालविभागोनोक्तस्तेसमस्तदशास्वपियथा
ष्यं३ दर्शितेसुखदुःखप्रदाभवंति। ननुकस्यचिक्रममयजन्मसुखेनदुःखेननैकरूपेणगच्छति। येपिभोगिनस्तेपिनानामे
दुःखैरभिभूताभवंति। येपिलेहासिनोदिव्यमनास्तेपिकदाचित्घर्माभितप्ताः शीतलासुद्रुमछायासुसुखिनमि
त्यात्मानंमन्यंते। तदेवमादिसुखदुःखंसर्वेणसंसारजातेनविपर्ययेणानुभूतेनयतेति। तत्कथंसमस्तदशास्वपियो
गाःफलप्रदाभवंति। उच्यते। नतेयोगादशाष्टकवर्गफलहंतारः। किंतुसमस्तनवाफलंदशापतिदशाष्टकवर्गाश्रि
तमपिफलंवदति। अतोयथाकालंयथायोगोपिसमग्रजन्मनिफलंददात्येवमिश्रफलानुभावेनोगिनांदृश्य
णांश्चसंभवत्येव। एवंतावन्नाभसयोगाध्यायोयथाक्रमंश्रवपरिज्ञानं। तदुच्यते। दलयोगाख्यतियोगायाःसमकालं
मुपस्थानंनास्ति। तथादलयोगेःसहआश्रययोगानांतुल्यकालमुपस्थानंनास्त्येव। अथदलयोगेःसहआकृति
योगानामपवादः। अन्यानुश्रवीकान्विहायआश्रययोगानामप्ययपवादः। आश्रययोगास्तुविफलाभवंत्यन्ये
विमिश्रिताः। तस्मात्संख्यायोगाआश्रययोगाकृतियोगैश्चाभिभूयंते। आश्रययोगेनसंख्यायोगस्यावस्थानंभ
वति। तदाश्रययोगएवभवति। नान्याश्रययोगसंख्यायोगानांतुल्यापवादः। आश्रययोगेनसंख्यायोगाःक

क्रममिनूयते। उच्यते। यदि संख्यायोगो नाश्रययोगावस्थानां भवति। तदाश्रययोगस्यावकाश एव न संभवति। आ
श्रययोगेन संख्यायोगस्याबाधमाने सति अस्त्येवास्यावकाशः। संख्यायोगस्य किं। द्वे कस्मिन् राशौ यदा सर्वे ग्रहा भ
गो३ वंति। तदाश्रययोगो न भवति। संख्यायोगो भवति। तत्र यदि आश्रययोगेन संख्यायोगो निहूयते। तदा गोलकस्या
वनकाशः। अवकाश एव न स्यात्। परिभाषेयं निरवकाशविधयः सावकाशविधीन् बाधंते। अथैकराशिल
ग्नमधिकृत्य पुराणयवनमतेन यन्मार्द्धयोगशतमुक्तं। तदधुना प्रदर्श्यते। तेषां तत्र तावत्। ये विंशतिराशि
योगा विंशतिर्थे वराहमिहिरेण हिताः। किंतु तेषां मध्ये नंदायोगेन चत्वारो योगा अभिहिताः। लग्नचतु
र्थयोर्यदा सर्वे ग्रहा भवंति तदा गदा। चतुर्थसप्तमयोर्यदा सर्वे ग्रहा भवंति तदा शंखः। सप्तमदशमयोर्यदा तदा च
क्रकः। दशमलग्नयोर्यदा तदा ध्वजः। तत्र पूर्वोक्ता विंशतिः। शंखचक्रकध्वजैः सह चतुर्विंशतिः। संख्यायोगा सप्त
विंशतिरित्यधिकं शतं एवं सार्द्धशतं राशिवाहशाकेनाष्टादशकेनाष्टादशशतानि भवंति। तत्र सप्तविंशत्यधि
कस्य संख्यायोगशतस्योत्पत्तिः प्रदर्श्यते। तद्यथा। एषां विकल्पाः सप्तसप्तविकल्प एकः। एतदेकोनतं स
प्तसप्तविंशत्यधिकं शतं भवति। एतदेव वराहमिहिरेण विवाहपटले उक्तं। द्वित्र्यादियोगान् परिहृत्य
कस्मान्नोक्तं शतं सत्रिवनं विलग्ने। इति। अथ विकल्पगणितं प्रदर्श्यते। तत्राचार्येण विकल्पगणि २२२

तं संहितायामुक्तं। पूर्वेण पूर्वेण गतेन युक्तं स्थानं विनान्त्यं प्रवदंति संख्या। इष्टं विकल्पैः क्रमशोऽभिनीयनी
ते निवृत्तिः पुनरन्यतोऽति। अत्र यावत्संख्यानां विकल्पाः क्रियंते। तदंतानेकाद्यान् उपर्युपरि स्थापयेत्। तद्यथा।
अत्र सप्तानां तिर्यगेकाद्यासप्तानां न्यासः अत्र पूर्वेण पूर्वेण गतेन युक्तं स्थानं विनान्त्यमिति। पूर्वेणाग्रिमेणाग
तत्रांतिमो पूर्वगतः। तेन पूर्वेण पूर्वेण गते नेति युक्तमुपर्युपरिस्थानं विना वर्जयित्वेत्यर्थः। प्रथममधः स्थि
तं द्वयोरपि द्वयोः क्षिपेत्। एवं त्रीणि रूपाणि जातानि। तत्रोपरि क्षिपेत्। एवं षट् जातानि। स्वोपरि चतुर्षु क्षि
पेत्। एवं दश तत्र जातानि। तानि तत्र क्षिप्रे स्वोपरि पंचसु क्षिपेत्। एवं तत्र पंचदश जातानि। तानि स्वोपरि
षट्सु क्षिपेत्। तत्रैकविंशतिर्जातानि। अत्र परं कर्मणो नावाप्तं उपरि सप्तैव स्थिता। युक्तं स्थानं विना

१
६
५
४
३
२

तं पुनरधः प्रवृत्त्यैवं तत्रापि पंचविंशतिर्जाता। पुनरपि चतुर्थे पंचत्रिंशत्। पुनस्तृतीये पंचविंशतिः। पुनर्द्वि
तीये सप्त प्रथम एव। अथान्येन प्रकारेण संख्यानयनं लोमं विनिक्षिप्य वानुलोममधः क्षिपेत्। अनुलोमं
समाहृत्यादधस्तेन विना वर्जयेत्। न्यासः। ७।७६५४३२१। अत्र सप्तानामधोरूपं भेदाः। अनेन सप्तानां ना
गमपहृत्यावाप्ताः ७। एते द्वितीयस्थानात् षट्गुणा व्याधस्थितान्यादास्यां नागमपहरेल्लब्धमेकविंशति
ः। १२३४५६७। एते तृतीयस्थानात् पंचसंगुणय्य त्रिभिर्विभजेत्। लब्धं पंच ७ त्रिंशत्। ३५ एते अथ चतुर्थस्थानस्था

ज्याप्तं। एकविंशतिः २१। एतानि द्विसंगुण्य षड्भिर्विभज्याप्तं ७। एतानि एकं संगुण्य सप्तभिर्विभज्याप्तमेकं
१ एवं एकद्वित्रिचतुःपंचषट्सप्तविकल्पाः। एवमनेन प्रकारेण विकल्पगणितं ज्ञात्वा यथेष्टसंख्यान

व्याख्याय।	७	अथ तेषां विकल्पानां लोष्टप्रस्तारेणोद्धारः कर्तव्यः। इष्टा विकल्पाः क्रमशो निनीय
ते निरूपित्रिषु	२१ ३५	नरन्यनीतिरिति। यथेष्टसंख्यानां विकल्पा विकल्पनीया नामासाद्या द्वाराणि लिखे
ता। तत्रैक	२१	विकल्पेकैकं लोष्टं विक्षितं। स चाविकल्पानुत्पादयेत्। द्विकल्पे आद्यं स्थित्वा लोष्टं विक्षि
तोऽस्त्वा द्वि	७	तीयेन च लोष्टविक्षिते सविकल्पमुत्पादयेत्। एवं त्र्यादिषु विकल्पेषु आद्यस्थिरलोष्टवि
क्षिता तत्र	१	चाग्रन्यैः स्थिरलोष्टविक्षितैः सहान्यस्या यिकल्पानुत्पादयेत्। एवं तत्राप्रथमस्यापा

मनं कार्यं। नीते निवृत्तिरिति वचनात्। उक्तं सद्दैवी शंकरेण। वर्णसंख्याककोष्ठारव्यां द्वयोर्द्वयोरपेयसं
ख्यकाः। नेयो नोन्यत्र तत्स्पूर्वस्मात्पूर्वश्चाप्यनुक्रमात्। नयोद्धामान मानात्सपूर्वतानिः। वन्तरात्। नेयंता
द्वन्द्राधाष्टकोष्ठनिष्ठा विधिर्विधेरिति। तद्यथैकविकल्पाः। आदित्यः। चंद्रः। भौमः। बुधः। जीवः। शु २३३
क्रः। सौरः। एवमेकविकल्पाः सप्त। अथ द्विविकल्पाः। रविचंद्रौ रविभौमौ रविबुधौ रविजीवौ।

रविशुक्रौ। रविसौरौ। एवमादित्येन सह षट्। शशिभौमौ। शशिबुधौ। शशिजीवौ। शशिशुक्रौ। शशिसौरौ।
एवं चंद्रेण सह पंच। भौमबुधौ। भौमजीवौ। भौमशुक्रौ। भौमसौरौ। एवं भौमेन सह चत्वारः। बुधजीवौ। बुधशुक्रौ। बु
धसौरौ। बुधेन सह त्रयः। जीवशुक्रौ। जीवसौरौ। एवं जीवेन सह द्वौ। शुक्रसौरौ शुक्रेण सह एकः। एवं विकल्पाः। ए
वं एकविंशतिः। अथ त्रिविकल्पाः। रविचंद्रभौमाः। रविचंद्रबुधाः। रविचंद्रजीवाः। रविचंद्रशुक्राः। रविचंद्रसौराः।।
एवमादित्यचंद्रयोः पंच। रविभौमबुधाः। रविभौमजीवाः। रविभौमशुक्राः। रविभौमसौराः। एवमादित्यांगा
रकयोश्चत्वारः। रविबुधजीवाः। रविबुधशुक्राः। रविबुधसौराः। एवमादित्यबुधयोस्त्रयः। रविजीवशु
क्राः। रविजीवसौराः। एवं द्वौ। आदित्यशुक्रसौराः। एवमेकः। एवमादित्येन सह दशविकल्पाः। पंचदश। चं
द्रभौमबुधाः। एवं च यथा चंद्रभौमजीवाः। चंद्रभौमशुक्राः। चंद्रभौमसौराः। एवं चंद्रभौमयोश्चत्वारः। चंद्रबुधजीवा
ः। चंद्रबुधशुक्राः। चंद्रबुधसौराः। एवं त्रयः। चंद्रजीवशुक्राः। चंद्रजीवसौराः। एवं चंद्रशुक्रसौराः। एवं चंद्रेण
सह दश। भौमेन बुधजीवाः। भौमबुधशुक्राः। भौमबुधसौराः। एवं बुधेन सह त्रयः। जीवशुक्रसौराः। १। एवं
त्रिविकल्पाः। पंचत्रिंशत्। अथ चतुर्विकल्पाः। रविबुधचंद्रभौमबुधाः। रविचंद्रभौमजीवाः। रविचंद्रभौम
शुक्राः। रविचंद्रभौमसौराः। एवं चत्वारः। रविचंद्रबुधजीवाः। रविचंद्रबुधशुक्राः। रविचंद्रबुधसौराः।

...बुधसौराः। रविभौमबुधशुक्राः। एवं त्रयः। रविभौमजीवशुक्राः। रविभौमजीवसौराः। एवं द्वौ। रवि
भौमशुक्रसौराः। एवमेकः। रविबुधजीवसौराः। रविबुधशुक्रसौराः। एकः। रविबुधजीवसौराः। रविबुधशुक्रसौराः। ए
वं द्वौ। रविजीवशुक्रसौराः। एकः। एवमादित्येन सह विंशतिः। चंद्रभौमबुधजीवाः। चंद्रभौमबुधशुक्राः। चंद्रभौ
मबुधसौराः। एवं त्रयः। चंद्रभौमजीवशुक्राः। चंद्रभौमजीवसौराः। एवं द्वौ। चंद्रभौमशुक्रसौराः। एकः। चंद्रबुधजी
वशुक्राः। चंद्रबुधजीवसौराः। चंद्रबुधजीवसौराः। एवं चंद्रमसा सह दश। भौमबुधजीवशुक्राः। भौमबुधजीव
सौराः। भौमबुधशुक्रसौराः। भौमजीवशुक्रसौराः। एवं भौमेन सह चत्वारः। बुधजीवशुक्रसौराः। एवं चतुर्विक
ल्पाः पंचत्रिंशत्। अथ पंचविकल्पाः। रविचंद्रभौमजीवाः। रविचंद्रभौमबुधशुक्राः। रविचंद्रभौमबुधसौराः। एवं
त्रयः। रविचंद्रभौमजीवशुक्राः। रविचंद्रभौमजीवसौराः। एवं द्वौ। रविचंद्रभौमशुक्रसौराः। एकः। रविचंद्रबुध
जीवसौराः। रविचंद्रबुधशुक्रसौराः। रविभौमबुधजीवसौराः। रविभौमबुधशुक्रसौराः। रविभौमजीवशुक्रसौ
राः। रविबुधजीवशुक्रसौराः। एवमादित्येन सह पंचदश। चंद्रभौमबुधजीवशुक्राः। रविभौमबुधजीवशुक्रसौरा
ः। चंद्रभौमबुधशुक्रसौराः। चंद्रभौमजीवशुक्रसौराः। चंद्रबुधजीवशुक्रसौराः। एवं चंद्रमसा सह पंच। भौमबुध २३८
जीवशुक्रसौराः। एवं पंचविकल्पाः। एकविंशतिः। अथ षड्विकल्पाः। रविचंद्रभौमबुधजीवसौराः। रविबुध

जीवशुक्रसौराः। चंद्रभौमबुधजीवशुक्रसौराः। एवं षड्विकल्पाः। सप्त। रविचंद्रभौमबुधजीवशुक्रसौराः। सप्तविक
ल्प एक एव। एवं सप्तविंशत्यधिकं विकल्पशतं व्याख्यातं॥ छ॥ इति भट्टोत्पलविरचितायां जगच्चंद्रिकाभिधानायां बृह
ज्जातकविवृतौ नाभसयोगाध्यायो द्वादशः॥ ॥छ॥ ॥अथातश्चंद्रयोगाध्यायो व्याख्यायते। तत्रादावेवार्कात्केंद्र
पणफरापोक्लिमस्थे चंद्रमसि जातस्य स्वरूपं मालिन्याह। अधमसमवरिष्ठान्यर्ककेंद्रादिसंस्थे शशिनि विनयवित्त
ज्ञानधीनैपुणानि। अहनि निशि च चंद्रे स्वेऽधिमित्रांशके वा सुरगुरुसितदृष्टे वित्तवान् स्यात् सुखी च॥१॥ अधमसमव
रिष्ठानीति। विनयो नीतिः सुशीलता। वित्तं धनं। ज्ञानं शास्त्रावबोधः। धीः बुद्धिः। नैपुण्यं कार्येषु श्रमदर्शित्वं। अ
र्कादादित्यात् केंद्रादिसंस्थे यथा। केंद्रपणफरापोक्लिमस्थे शशिनि चंद्रे जातस्य विनयं वित्तं ज्ञानं धीः। नैपुण्यान्य
धमसमवरिष्ठानि निकृष्टमध्यमोत्तमानि भवंति। एतदुक्तं भवति। यस्य जन्मन्यादित्यात् केंद्रस्थः शशी भव
ति। तस्यैतानि विनयादीन्यधमानि भवंति। अधमशब्देनैतेषामभावः। यस्माद्यवनेश्वरः। मूर्खान् दरिद्रांश्चप
लान्विशीलांश्चंद्रः प्रसूतेऽर्कचतुष्टयस्थः। यस्य जन्मनि पणफरस्थश्चंद्रः सूर्याद्भवति। तस्यैतानि मध्यमानि भवं
ति नवातिनवंतीत्यर्थः। यस्य जन्मन्यादित्याच्चंद्र आपोक्लिमस्थो भवति। तस्य विनयादीनि वरिष्ठानि भ
वंति। नवातिनवंतीत्यर्थः। यस्य जन्मन्यादित्याच्चंद्रश्चो तथा च यवनेश्वरः। कुर्यात् द्वितीये धनिनां प्रसूति

मापाद्भिमस्थुउत्ता यजानामातामहनोत्पादिवदं शान्नी निस्वांशकस्थ चधिमित्रांशकस्थ अहनि निशि वा यथावसं
ख्यं सुरगुरुसितदृष्टे जीवशुक्राभ्यामेवलोकिते जातो वित्तवान्। धनी सुखी च भोगवान् स्यात् भवेत्। एतदुक्तं भवति। य
स्याह्नि दिवा जन्म भवति चंद्रश्च यत्र राशौ स्वनवांशकस्थो भवति। अधिमित्रांशकस्थो वा सुरगुरुणा जीवेन विलोकि
तः। तदा मनुष्यो वित्तवान् सुखी च भवति। अथ यस्य निशि रात्रौ जन्म भवति चंद्रमा स्वनवांशकस्थो भवति। शुक्रेण
दृश्यते। तदा जातो वित्तवान् सुखी च भवति। अत्राहनि निशि चंद्रे स्वाधिमित्रांशकस्थे वा स्थिते यथासंख्यं सुरगु
रुसितदृष्टे केचिद्व्याचक्षते। अयुक्तमेतत्। यस्माद्भगवान् गार्गिः। स्वांशाधिमित्रस्यांशे वा संस्थितो दिवसे शशी। गुरु
णा दृश्यते तत्र जातो वित्तवान् सुखान्वितः। निश्येवं भृगुणा दृष्टः शशी जन्म निशाश्यने। विपर्यये स्थे शीतांशौ जा
यतेऽल्पधनो नरः। तथा च यवनेश्वरः। स्वांशे शशी शशांशार्यवदृष्टमूर्त्तिर्निशीश्वरोत्यत्रिकरः प्रदिष्टः। तद्वन्मानृति
करः सतस्य दृष्टो दिवा देवपुरोहितेन॥ ८॥ अथाधियोगाख्यं योगं सफलं वसंततिलकेनाह॥ सौम्यैः स्मरा
निधनेषधियोग इंदोस्तस्मिंश्चमूपसचिवक्षितिपालजन्म। संपन्नसौख्यविभवाहतशत्रवश्च दीर्घायुषो १३५
विगतरोगभयाश्च जाताः॥ ९॥ इंदोश्चंद्रात् सौम्यैर्बुधगुरुशितैः स्मरारिनिधने शुभे सप्तमषष्ठाष्टमे शुभस्थाने द्व
योरेकस्मिन् वा स्थाने सर्व एव भवंति। तदा अधियोगो भवति। अत्र केचित् षष्ठसप्तमाष्टमानां स्थानानां सौ

नां सौम्यग्रहाणां यथावस्थानां दृष्टशून्यताया योगो व्याख्यातः। तथा चुक्तं। यस्मात्कृतकीर्त्तिः। निधनं द्यूनं षष्ठं चंद्रा
नाद्यदाशुभैर्युक्तं। अधियोगः। स प्रोक्तो व्यासमस्तौ समस्तश्च पूर्वैः। व्यासमस्तौ विस्तरतो पूर्वैश्चिरंतनैराचार्यैः सवसम
धसमस्तप्रकारः प्रोक्तः कथितः। तद्यथा। षष्ठे राशौ यदा सर्वे सौम्या भवंति तदेकः। सप्तमे द्वितीयः। अष्टमे तृतीयः। षष्ठ
सप्तमयोश्चतुर्थः। षष्ठाष्टमयोः पंचमः। सप्तमाष्टमयोः षष्ठः। षष्ठसप्तमाष्टमेषु सप्तमः। एवमवस्थितेषु सौम्येष्वधि
योगाः। अर्थाद्द्वैवमवस्थितेषु पापेषु पापयोगाः। मिश्रैर्मिश्रः। तथा च श्रीदेवकीर्त्तिः। षष्ठसप्तमाष्टमसंस्थैः शुभैर्जातसौ
म्यैः शुभोऽधियोगोऽयं। पापः पापैरेवं मिश्रैर्मिश्रस्तथैवोक्तः। अधियोगजातानां फलमाह। तस्मिंश्चमूपसचिवक्षि प
ति। पालजन्मेति। तस्मिन्नधियोगे जातश्चमूपः। सेनापतिर्भवति। सचिवो मंत्री वा भवति। क्षितिपालो नृपालो रा
ज्ञा वा भवति। एषां युगपदसंभवात् पृथग्व्याख्यातं। तथा च बादरायणः। शशिनः सौम्याः षष्ठे द्यूने वा निधनसं
स्थिता वा स्फुटः। जातो नृपतिर्जयी मंत्री वा सैन्यनायको वापि तेनेव उक्तं। बुधगुरुशितैरुक्तं स्ववीर्यैर्नृपो मध्यम
वीर्यैः सचिवः। हीनवीर्यैः सेनापतिः। एषामन्यतमा अधिसंपन्नसौख्यविभवा भवंति। संपन्नमिति भूतं। सौ
ख्यं वित्तवश्चैश्वर्यं येषां ते संपन्नसौख्यविभवाः। हतशत्रवो नष्टरिपवः। दीर्घायुषश्चिरजीविनः। विगतरोगभ
याः। स्वस्थदेहा निर्भया भवंति। एवंविधे योगे जाता भवंति। केषांचिन्मते नराजयोग एव। तथा वसा

रावल्यां॥ ज्ञानं षष्ठमथाष्टमं॥ शिशिरगोः आज्ञाः समस्तास्तु ताः। क्रूराणां गोचरे। न पतितानां चाल्यया इरतः। नृपा
लं प्रनवः संयस्य जलधवेलावनांतोद्भवैः सेनामत्तकरींद्रदानसलिलं सृंगे भृङ्गैः पीयते। तथा च। अर्सैवंजामित्र
निधनमथवाशीतरुचितो गताः सर्वे सौम्यास्त्रिमिह जनयेन्नरपतिः। वृते वर्मिकं गतवति विषया दस्युपया सा॥
प्रतापिर्यस्य हालतिहरयेशत्रुसुहृशां॥ ८॥ अथ सुनफानफादुरुधराकेमद्रुमसाख्यं योगचतुष्टयं शार्दूल
विक्रीडितेनाह। हित्वार्कं सुनफानफादुरुधराः स्वांत्योभयस्थैर्ग्रहैः शीतांशोः कथितान्यथा तु बहुभिः केमद्रु
मोन्यैस्त्वसौ। केंद्रे शीतकरेथवा ग्रहयुते केमद्रुमो नेष्यते। केचित्केंद्रनवांशकेषु च वदंत्युक्तिप्रसिद्धा न ते॥ ९॥ हित्वा
र्कमिति। कं मे अर्कमादित्यं त्यक्त्वा यदा अन्यो ग्रहः कश्चित् भौमादिकः शीतांशोश्चंद्रात् स्वांत्योभयस्थो भवति॥
द्वितीयस्थो वा द्वादशस्थो वा द्विद्वादशस्थो वा भवतः। तदा सुनफानफादुरधराख्यं योगत्रयं भवति। एतदुक्तं भव
ति। अर्कं वर्जयित्वा यदान्यो ग्रहः कश्चिद्भौमादिर्द्वितीयस्थाने तदा सुनफानामयोगो भवति। अथार्कं वर्ज १२६
यित्वा चंद्राद्द्वादशे कश्चिद्ग्रहो भवति। तदा अनफानामयोगो भवति। एवं अर्कं वर्जयित्वा द्विद्वादशेग्रहा
भवतस्तदा दुरुधुरानामयोगो भवति। अत्र योगत्रयेयथादित्यो द्वितीयद्वादशे वा स्थाने भवति। तदा नयोग
भंगो भवति। किंतु योगकर्तृणां मध्ये न गण्यते। एतदुक्तं भवति। आदित्यो द्वितीयद्वादशे भवतु वा मा भवतु। भौ

मादिकस्तत्रस्थो यथा दर्शितयोगकर्त्ता भवति। एते योगा बहुभिराचार्यैः पठिताः। अन्यथा केमद्रुमो उक्तः॥ अस्माद्यो
गत्रयाद्येकोपि न भवति। तदा केमद्रुमाख्यो योगो भवति। एतदुक्तं भवति। भौमादीनां मध्ये चंद्रात् द्वितीये द्वादशे वा क
श्चिद्ग्रहो न भवति। तदा केमद्रुमाख्यो योगः। अन्येषां गर्गादीनामेवं मतं। केंद्रे शीतरेथवा ग्रहयुते केमद्रुमो नेष्यते
। अन्येषामेवं मतं। केंद्रे जन्मलग्नकेंद्रे शीतकरे चंद्रे भौमादिग्रहयुते ग्रह विरविरहितयोरपि वद्वितीयद्वाद
शस्थानयोः केमद्रुमो न भवति। केंद्रग्रहयुत इत्यत्र केचिच्चंद्रकेंद्रमेव केवलं व्याख्यातं। एवमन्ये शीतकरे कर
केंद्रे तस्मिन्नेव ग्रहयुत इति व्याख्यातं। तथा युक्तं चंद्रकेंद्रयुते चंद्रमसोऽपियोगांतर्न भवति। शीतकरे ग्रहयुत इ
त्येतदनर्थकं स्यात्। अत्र च तगवानुगार्गिः। यद्यर्थेकर्गकेंद्रगश्चंद्रादिना तानुनचेद्ग्रहाः। कश्चित्स्याद्विना चंद्रल
ग्नात्केंद्रगतोथवा। योगः केमद्रुमो नाम। तदा स्यात्सुत्रगर्हितः। भवंति निंदिता योराः दारिद्र्यामयसंयुताः। त
था च सारावल्यां सुनफानफादुरधराः क्रमेण योगाः भवंति। रविवरहितैः। विनांत्योभयस्थैः स्थेः केरवव्रम
वां धवात्विहगैः। न भवंति तदा योगाः केंद्रग्रहवर्जितं शशांकश्च। केमद्रुमो तिकष्टः शशिनि समस्तग्रहादृष्टे। ए
वं केंद्रे शीतकरेथवा ग्रहयुते केमद्रुमो नेष्यते। अन्ये आचार्या नेच्छंति। वराहमिहिरस्तु न हि तत्त्वेव। यस्मि
न्नर्थे तस्येतद्वाक्यं। अथान्यो यथा केमद्रुम इति। एवमुक्तापरमतमुक्तं। अथ परमो केंद्रे शीतकरेथवा ग्रह

द्भुतो केमद्रुमो नेष्यते स्वल्पज्ञातकेपि सुनफाद्रुरुधुरानावकेमद्रुमउक्तः। तथाचा। रविवर्जे द्वादशगैरनफा चन्द्रा द्वि
यगैः सुनफा। उभयस्थितैर्दुरुधुराकेमद्रुमसंज्ञितोन्यः। सत्यस्यापि सुनफानफाद्रुरुधुरानावेकेमद्रुमः। तथा चन
राक्य। सुनफानुनफायोगोदोरुधुरश्च इसंयुतस्तेत्रात। प्राक्शृश्रुतोग्रहेन्दुरुनयगतेस्तेशुरविवर्जाः केमद्रुमो
न्ययोगोन्यथा सवेशृद्धितं। जन्मा केचित्केन्द्रनवांशकेषिति। केचिदाचार्याः केन्द्रेशुकेचिन्नवांशकेषुयोगत्रयं
वदंति। यथा चन्द्रात् द्वितीयद्वादशोभयस्थिते ग्रहैः सुनफायोगाव्याख्याताः। तथा केचिद्बुतिकोत्तिजीवशर्मप्रभृ
तिः केन्द्रवशान्नवांशकवशाद्व्याख्याताः। एतदुक्तं भवति ताराग्रहेश्चन्द्राच्चतुर्थस्थानस्थे सुनफानदशमस्थैरनफा।
चतुर्थदशमस्थैर्दुरुधुरा। अतोन्यथा केमद्रुमो। तथा चक्रतको द्विः। चन्द्र चतुर्थस्थैः सुनफानदशस्थैः क्रा। द्विती
नफाविहगैः। उभयस्थितैर्दुरुधुराकेमद्रुमो संज्ञितोन्यः। केचित्केन्द्रनवांशकेशु उवदंति। यत्र तत्र राशौ यत्रां
शि संबंधिनि नवांशके चन्द्रमा भवति। तदा अनफा। अथ नवांशकराशे द्वितीये द्वादशे च ताराग्रहो भवतो
तदा दुरुधुरा। चन्द्रनवांशकराशितो द्विद्वादशराशीयदिग्रहरहितो भवतः। अतो अन्यथा केमद्रुमः। तथा चजी १३७
वशर्मा। यद्राशिसंज्ञेशीतांशुर्नवांशो जन्मनि स्थितः। तद्द्वितीयस्थितैर्योगाः सुनपाख्याः प्रकीर्तिताः। द्वादशैरनफा
ज्ञेयो गो ग्रहैर्द्विद्वादशस्थितैः। पोक्तो दुरुधुरा योऽन्यथा केमद्रुमः स्मृतः। उक्तिरशमिद्धानते। येषामेवंविधं

वं ८५

मतं। वैतेषामुक्तिर्लोकेन प्रसिद्धा दृष्टज्योतिषिकैर्नागीकृतं इत्यर्थः। अथ सुनफानफादुरुधुरासंख्याज्ञानमिंद्र
वज्रयाह। त्रिंशत्सरूपा सुनफानफाख्या षष्टित्रयं दौरुधुरे भेदाः। इछाविकल्पैः क्रमशो भिनीयनीते निवृत्तिः। गुरुंर
स्पना स्थितिः। ४। एकत्रिंशत्सुनफाख्या योगाः। ता एवं तत्रवानपाख्याः। षष्टित्रयं अशीत्यधिकं शतं दुरुधुराप्र
भेदानां। एषां पूर्वविधिकल्पगणितं। इछाविकल्पेरित्यादि। एतत्खोष्टप्रस्तारं पूर्वमेव नानभयोगाध्याये व्याख्या
तं। इछाविकल्पैः क्रमशः परिपाद्यालोष्टकमभिनीयते निवृत्तिः। कार्या। पुनर्नूयोन्यनीतिरित्यत्रस्थानांतरेवा
लनं। अथ सुनफादयो भौमबुधगुरुसितासिताः पंचभिनिर्ष्पाद्यंते। तस्मादिछाविकल्पाः। एवं तेषां न्यासः। ५ | अ
त्रपाचस्त्र्वेणगतेनयुक्तस्थानं विनात्यप्रवदंति संख्यामिति लब्धोजातं। ५ | अथवा | ५ ४ ३ २ १ | ३ | षा
त्र्यतसंख्योत्व संख्याजाता एवमेकविकल्पपंचद्विविकल्पाद्दश त्रिविक १० कल्पाद्दश | १ २ ३ ४ ५ | २ | री
चतुर्विकल्पापंच पंचविकल्पा एक एवमेकत्रिंशत्। तद्यथा। द्वितीयेचं ५ | शज्ञोम | १ | बुध
जीवशुक्राः। एवमेकविकल्पाः। भौमबुधौ भौमजीवौ। भौमशुक्रौ। बुधसितौ | बुधसौ | रौ। जीव
शुक्रौ। जीवसौरौ। शुक्रसौरौ। एवं विकल्पाद्दशः। अथ त्रिविकल्पाः। भौमबुधजीवाः। भौमबुधशुक्राः। भौमबुधसौ
राः। भौमजीवशुक्राः। भौमजीवसौराः। भौमशुक्रसौराः। बुधजीवशुक्राः। बुधजीवसौराः। बुधशुक्रसौराः। एवं

३।विकल्पास्त्रिंशत्॥ अथ चतुर्विकल्पाः। पंच। सोमबुधजीवशुक्रसौराः। पंचविकल्प एकः। एवमेकत्रिंशत् स्युर्नफायो-
गाः। एवमाननैद्वादशाष्टैरनफायोगा एकत्रिंशत्। अथ दुरुधुराविकल्पा। एषां लोष्ठप्रस्तारो वा स्वबुद्धिवि-
कल्प्यैः क्रमशो रचनीयेति। न्यायेनच्युतत्रिंशदेको द्वादशो। द्वितीयो द्वितीये। एवं तको द्वादशो द्वितीये द्वितीय
ः। तद्यथा। सोमबुधे १ बुधसोमौ २ सोमजीवौ ३ जीवसोमौ ४ सोमशुक्रौ। ५ शुक्रसोमौ ६ सोमसौरौ ७ सौरसोमौ
८ बुधजीवौ ९ जीवबुधौ १० बुधशुक्रौ ११ शुक्रबुधौ १२ बुधसौरौ १३ सौरबुधौ १४ जीवशुक्रौ १५ शुक्रजीवौ १६ जी-
वसौरौ १७ सौरजीवौ १८। शुक्रसौरौ १९ सौरशुक्रौ २० अथैको द्वितीयेको द्वादशो वैका। तद्यथा। सोमबुधजी-
वौ १ बुधे जीवसोमौ २ सोमौ बुधशुक्रौ। ३ बुधे शुक्रसोमौ। ४ सोमौ बुधसौरौ। ५ बुधः सौरसोमौ। ६। सोमौ
जीवशुक्रौ। ७ जीवशुक्रौ सोमः। ८। सोमौ जीवसौरौ। ९। जीवः सौरसोमौ। १० सोमशुक्रसौराः। ११ शुक्रसौरसो-
मः। १२ बुधे सोमजीवौ। १३ जीवौ सोमबुधे १४ बुधे सोमशुक्रौ १५ सोमशुक्रौ बुधः। १६ बुधे सोमसौरौ। १७ सो-
मसौरौ बुधः। १८। बुधे जीवशुक्रौ। १९ जीवशुक्रौ बुधः। २० बुधे जीवसौरौ २१ जीवसौरौ बुधः। २२ बुधशुक्रसौ-
रौ २३ शुक्रसौरौ बुधः। २४ जीवौ सोमबुधे। २५ सोमबुधे जीवः। २६। जीवे सोमशुक्रौ २७ सोमशुक्रौ जीवः।
२८ जीवौ सोमसौरौ २९। सोमसौरौ जीवः। ३० जीवौ बुधशुक्रौ। ३१ बुधशुक्रौ जीवः। ३२ जीवौ बुधसौरौ ३३

बुधसौरौ जीवः। ३४ जीवः शुक्रसौरौ ३५ शुक्रसौरौ जीवः। ३६ शुक्रौ सोमबुधे ३७ सोमबुधे शुक्रः। ३८ शुक्रौ सोमजीवौ
३९ सोमजीवौ शुक्रः। ४० शुक्रौ सोमसौरौ ४१ सोमसौरौ शुक्रः। ४२ शुक्रौ बुधजीवौ। ४३ बुधजीवौ शुक्रः। ४४ शुक्रौ बु-
धसौरौ बुधसौरौ शुक्रः। ४६ शुक्रौ जीवसौरौ ४७ जीवसौरौ शुक्रः। ४८ सौरौ सोमबुधे। ४९ सोमबुधे सौरः। ५० सौरौ
सोमजीवौ ५१ सोमजीवौ सौरः ५२ सौरौ सोमशुक्रौ ५३ सोमशुक्रौ ५४ सौरौ बुधजीवौ ५५ बुधजीवौ सौरः। ५६ सौरौ बु-
धशुक्रौ ५७ सौरः बुधशुक्रः। ५८ सौरौ जीवशुक्रौ ५९ जीवशुक्रौ सौरः ६० एवमेकत्रज्ञाताः। ८० अथैको द्वादशो द्वि-
तीये त्रयः। द्वितीये एको द्वादशो त्रयः। तद्यथा। सोमौ बुधजीवसिताः १ बुधजीवसिताः सोमः २ सोमौ बुधजीव-
सौराः ३ बुधजीवसौराः सोमः ४ सोमौ बुधशुक्रसौराः। ५ बुधशुक्रसौराः सोमः। ६ सोमौ जीवशुक्रसौराः ७ जी-
वशुक्रसौराः सोमः। ८। बुधे सोमगुरुसिताः। ९ सोमगुरुसिता बुधः। १० बुधे सोमजीवसौराः। ११ सोमजीवसौरा
बुधः। १२ बुधे सोमसितसौराः। १३ सोमसितसौरा बुधः। १४ बुधे जीवशुक्रसौराः। १५ जीवशुक्रसौरा बुधः।
१६। जीवौ सोमबुधशुक्राः। १७ सोमबुधशुक्रा जीवः। १८ जीवौ सोमबुधसौराः। १९ सोमबुधसौरा जीवः। २० एक-
मेकत्रिंशतं। १०० जीवे सोमसितसौराः। १ सोमसितसौरा जीवः। २ जीवौ बुधशुक्रसौराः। ३ बुधशुक्रसौरा जीव-
ः। धशुक्रसोमबुधजीवाः। ५ सोमबुधजीवाः शुक्रः। ६ शुक्रौ सोमबुधसौराः। ७ सोमबुधसौराः शुक्रः। ८ शुक्रौ

नोमजीवसौरा:।१९ नोमजीवसौरा:शुक्रा:।२० शुक्रो बुधजीवसौरा:।२१ बुधजीवशुक्रा:सौरा:।२२ सौर नोम बुधजी
वा:।२३ नोम बुधजीवसौरा:।२४ सौर नोम बुधशुक्रा:।२५ नोम बुधशुक्रसौरा:।२६ सौर नोमजीवशुक्रा:।२७ नोमं
जीवशुक्रसौरा:।२८। सौर बुधजीवशुक्रा:।२९ बुधजीवशुक्रा:सौरा:।३० एकत्र ३० अथ द्वितीये एकादशे च
वारा:। चत्वारो द्वितीये चैका:। तद्यथा। नोमो बुधजीवशुक्रसौरा:।१ बुधजीवशुक्रसौरा नोम:।२ बुधो नोमजीव
शुक्रसौरा:।३ नोमजीवशुक्रा सौरा बुध:।४ धजीवो नोमबुधशुक्रसौरा:।५ बुध नोमशुक्रसौरा जीवा:।६ शुक्रो।
नोमबुधजीवसौरा:।७ नोमबुधजीवसौरा शुक्र:।८ सौरो नोमबुधजीवसौरा शुक्रा:।९ नोमबुधजीवशुक्रा:
सौरा:।१० एवमेकत्र ३० अथ द्वादशे द्वावेव द्वितीये। तद्यथा। नोमबुधौ जीवशुक्रौ।१ जीवशुक्रौ नोमबुधौ।
२ नोमबुधौ जीवसौरौ।३ जीवसौरौ नोमबुधौ ४ नोमबुधौ शुक्रसौरौ ५ शुक्रसौरौ बुधजीवौ।६ बुधशुक्रौ जीवसौरौ
७ जीवसौरौ बुधशुक्रौ।८ जीवशुक्रौ बुधसौरौ।९ बुधसौरौ जीवशुक्रौ।१० एवमेकत्र १६०। अथ द्वितीये त्रयो द्व
शे त्रयो द्वितीये द्वादशे। तद्यथा। नोमबुधजीवसितसौरा:।१ जीवसितसौरा: नोमबुधौ २ नोमजीवशु २३९
क्रबुधसौरा:।३ बुधशुक्रसौरा:। नोमजीवौ।४ नोमशुक्रौ बुधजीवसौरा:।५ बुधजीवसौरा: नोमशुक्रौ ६ नोम
सौरौ बुधजीवशुक्रा:।७ बुधजीवशुक्रा नोमसौरा:।८ बुधजीवौ नोमशुक्रसौरा:।९ नोमशुक्रसौरा: बुधजी

वौ।२० एवमेकत्र २७० बुधशुक्रौ नोमजीवसौरा:।१ नोमजीवसौरा: बुधशुक्रौ २ बुधसौरौ नोमजीवशुक्रा:।३ नोमजी
वशुक्रा बुधसौरौ ४ जीवशुक्रौ नोमबुधसौरा:।५ नोमबुधसौरा: जीवशुक्रौ ६ जीवसौरौ नोमबुधशुक्रा:।७ नोमबुधशु
क्रा जीवसौरौ ८ शुक्रसौरौ नोमबुधजीवा:।९ नोमबुधजीवा: शुक्रसौरौ २० एकत्र २८० एवं दुरुधुरायोग मशीत्यधि
कं शतं। प्रदर्शितं।।७।। अथ सुनफानफयोर्जातस्य फलं मालिन्याह। स्वयमधिगतवित्तपार्थिवतत्समो वा भवति
हि सुनफायां धीधनख्यातिवांश्च। प्रभुरगदशरीर: शीलवान्ख्यातकीर्तिर्विषयसुखसुवेषो निर्वृतश्चानफायां
।।५ स्वयमधिगतवित्त इति। स्वयमात्मना अधीगतं आर्जितं वित्तं येन बाहुर्जितं धनं पार्थिवो राजा तत्समो
वा यदि राजा न भवति। तदा राजतुल्य धीर्धीर्धनख्यातिमांश्च। बुद्धिवित्तकीर्तिभिर्युक्त:। एवंविध: सुनफायां यो
जातो भवति। प्रभुरिति। प्रभुरप्रतिहताज्ञ:। अगदशरीरो निरुजदेह:। अविद्यमानागदायस्य। शील
शीलवान्। ममधिनयाहि निर्गुणो गुणैर्युक्त:। ख्यातकीर्ति:। प्रथितयशा:। जनविदितसफुसा विषयसुख
शब्द:स्पर्शरसरूपगंधा विषयास्तत्सुखैर्युक्त:। ननु किं तदतिरिक्तं सुखमस्ति। उच्यते। अस्त्रिया योगिनां।
मनसु। सुवेष:। अनुलेपनालंकरणमाल्यै:मद्रव्यधारणशीला। निर्वृतो मनोदु:खविनिर्मुक्त:। एवं नफा
यां जातो भवति।।७।। अथ दुरुधुराकेमद्रुमयोर्जातस्य स्वरूपं वसंततिलकेनाह। उत्पन्नभोगसुख

नुकूलधनवाहनाद्युपभोगान्वितो गुरुधुराधरनवः सुनृत्यः। केमद्रुममलिनदुःखितनीचस्त्वाःप्रेष्याःखलाश्च नृपतेरपि
वंशजाताः॥ ६ ॥ उत्पन्नभोगसुखसुकृत्यन्नतत्रयथोत्पन्नेर्भोगैः सुखानि भुंक्ते धनेन वित्तेन वाहनेरश्वादिभिराढ्यः
त्यागान्वितो दाता। सुनृत्यः। शोभननृत्यः। एवंविधो दुरुधुराख्ययोगे जातो भवति। केमद्रुम इति। मलिनो मलवा
साः। क्षीणाल्पमदुःखितनराराः मानमायेर्दुःखैरन्यतनीचाः स्वकुलानुचितकर्मकारकः। निःस्वो निर्धनः। प्रेष्यः
परकर्मकरः। खलो दुर्जनस्वभावः। एतेषां सुकार्थानां अन्यतमेन युक्तो भवति। यदि नृपते राज्ञो वंशे राजकुले
राजकुले जातस्तथाप्येवंविधः। केमद्रुमे जातो भवति। कृतिरत्नवक्रवचनं पठंति। केमद्रुमे मलिनदुःखितनि
स्वाः प्रेष्याः खलाश्च नृपते वंशजाता। तथापि न कश्चिद्दोषः॥ ७ ॥ एतत्रायवसुनफादिषु सामान्येन फलमभिध
येदानीं ग्रहवशाद्विशेषफलमाहमालिह। ७ साहसोर्य धनसाहसवान् महीजः सौम्यः पटुः सुवचनो निपु
णः कलासु। जीवोर्थधर्मसुखनाक् नृपपूजितश्च कामी भृगुर्बहुधनो विषयोपभोक्ता। ७ उत्साहवान्ब
लीउद्योगशीलः। सौर्यवान्रणप्रियः। धनवान्वित्तान्वितः। साहसवान्सममी हितकार्यकरः। यदाद्य १४०
कार्यं यदा कालेन विचार्य करोति यः। साहसी साहसिकः। एवंविधो महीजोऽङ्गारको यदि योगकर्त्ता भवति। त
दा जातो भवति। पटुर्दक्षः। सुवचनः शोभनवाक् सुनिपुणः नृत्यविरचनस्तकलिपिषु प्रसन्नदृष्टिः। य
दि सौम्यो बुधो योगकर्त्ता भवति। तदेवंविधो जातो भवति। अर्थभाक् धनानां भाजनं धर्मभाक् धर्मक्रियास्वनुरतः
सुखभाक् सुखी। नृपपूजितो राजमान्यः। यदि जीवो गुरुर्योगकर्त्ता भवति तदेवंविधो जातो भवति कामी कामु
कः। स्त्रीलोलः। बहुधनः। प्रभूतार्थः। विषयोपभोक्ता विषयाणामिंद्रार्थानामुपभोक्ता। उपभोगशीलः। तसुखान्वि
तः। यदि शुक्रो योगकरस्तदेवंविधो जातो भवति॥ ८ ॥ अथ शनैश्चरयोगकर्त्तरि दुरुधराख्यस्वरूपं वंशमासिद्ध
स्याह। ग्रहे जातस्य स्वरूपं पुष्पिताग्रयाह। परविभवपरिच्छदोपभोक्ता रवितनयो बहुकार्यकृद् गुणेशः। अशुभ
दुरुधोक्तिहृद्यमूर्तिर्मलिनतनुश्च शुभोन्यथान्यदूह्यं॥ ९ ॥ पराजितानां विभवानां ऐश्वर्याणां परिच्छदानां गृहवस्त्र
वाहनपरिवाराणां उपभोक्ता भवति। बहुकार्यकृतो नानाविधानां कार्याणां कर्त्ता गणेशो बहुगणस्वामी। ग
णाः संघास्तेषामनुगः। एवंविधो रवितनयः शनैश्चरो योगकरो भवति। तदा जातो भवति। अत्र योगत्रये सुनफा
नफादुरुधुराख्या एकैकस्य ग्रहस्य फलमुक्तं यथादि संभवे यादिकं फलं वाच्यं। अशुभ भदिति। दुरुधुरा
अत्रोक्ति वसेहृद्यमूर्त्तिर्हृद्यमानशरीरो अशुभग्रहनिष्ठ फलकर्ता। एतदुक्तं भवति। यस्य दिवा जन्म भवति
वंद्रमाश्च हृद्यचक्रार्द्धे भवति। तस्य जन्माशुभं भवति मृत्युरुपोदारिद्र्यादियुक्तो भवति। गलितनुरिति।
गलितनुर्हृद्यतनुः। एतदुक्तं भवति। अहश्येचक्रार्द्धे व्यवस्थित इति। एवंविधे दिवा जन्मनि यस्य वंद्र

मा भवति। तस्य शुभं जन्म। स सुरूपऐश्वर्यादिगुणयुक्तो भवति। अन्यथा अन्यदृशं। व्यक्तप्रकारादन्यथा भेव
द मसि। फलमूह्यं। स्वबुद्ध्या विकल्पनीयं। एतदुक्तं। राशौ जन्माद्दृश्यवक्राद्ये यस्य चंद्रमा भवति तस्य शुभं जन्म
